Missing: १३

भाषापरिच्छेदः कारिकावलीया न्याय
चन्द्रिकाख्याटीकासहिता
१२ ३०
पत्राणि ३५

13

५ सामान्यतमत्वं चद्रव्यादिभेदसत्वकमूर्त्तत्वं ननु द्रव्यादि सप्तमूर्तिमन्नाभि... सप्तमिन्नस्यजसिद्धेः ५

साक्षात्परंपरयावापदार्थज्ञानस्यपरमपुरुषार्थहेतुत्वादुद्देशोलक्षणंतत्रपदार्थाज्ञाः ॥ द्रव्यंगुणइतितोउद्देशोयंश्चपदार्थाःसप्तकेतेद्रव्यादयइत्यर्थः पदार्थत्वमभिधेयत्वं
एडोपधिः पदस्यार्थःपदार्थइतियोगाद्धेरेलपदार्थविधेयत्वंचतत्रपदस्यकत्वंद्रव्यमेवसामान्यलक्षणमपिच एडधर्मेलोपस्थितानांतेषांतेनलक्षणमकृत्वास
र्वेविभागइतिनन्यूनतापि सप्तविभागोदेवसप्तत्वेसंख्यालाभसंभवेपिसप्तेतिविधानंन्यूनाधिकसंख्याव्यवच्छेदार्थंबोध्यं ननुसिद्धासिद्धिव्याघातःश्रुतिरि
तस्यसिद्धेर्निषेधायोगात्असिद्धेश्चतियोगिज्ञप्तिंविनानिषेधानुपपत्तेरितिचेन्नपदार्थत्वंद्रव्यादिसप्तान्यतमत्वव्याप्यमितिव्यवच्छेदार्थत्वात् एवमग्रे
पिद्रष्टव्यं ॥२॥ द्रव्यं विभजते क्षितीत्यादि द्रव्याणिनवकानि तानिक्षित्यादीनीत्यर्थः अंधकारस्तुयद्यपिनीलंतमइतिरूपवत्तयाप्रतीयतेतथापिनद्रव्यं आलोकस
तिज्ञानाभावेनतमःप्रतीतेर्गतार्थत्वात्तद्रूपवत्ताप्रतीतिर्भ्रमएवेतिभावः तत्रक्षितिःपृथिवीआपोजलानितेजोवह्न्यादिःमरुत्वायुःव्योमआकाशः ... आत्म
दिव्यवहारहेतुःदिक्कुड्येत्यादिव्यवहारहेतुःदेहीजीवात्मपरमात्मभेदेनद्विविधःआत्मापरमात्मनोचिरामकृष्णादिशरीरसंबंधात् मनःश्रोत्रेन्द्रियं एतेषांन
वानांद्रव्यत्वजातिमत्वंगुणवत्त्वंवासामान्यलक्षणंचद्रव्यत्वजातिसिद्धिरग्रेवक्ष्यते ॥३॥ गुणान्विभजते अथगुणाइतिगुणास्तुविंशतिरेचकेतेरूपरस २१

॥ द्रव्यंगुणस्तथाकर्मसामान्यंसविशेषकं ॥ समवायस्तथाऽभावःपदार्थाःसप्तकीर्तिताः ॥२॥ क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनोमनः ॥ द्रव्याण्यथगुणारूपंरसोगंधस्ततःपरं ॥३॥
॥ स्पर्शःसंख्यापरिमितिःपृथक्त्वंचततःपरं ॥ संयोगश्चविभागश्चपरत्वंचापरत्वकं ॥४॥ बुद्धिःसुखंदुःखमिच्छाद्वेषोयत्नोगुरुत्वकं ॥ द्रवत्वंस्नेहसंस्कारावदृष्टंशब्दएवच ॥५॥ उत्क्षेपणंततोऽवक्षे
॥ पणमाकुंचनंतथा ॥ प्रसारणंचगमनंकर्माण्येतानिपंचच ॥६॥ भ्रमणंरेचनंस्यंदनोर्ध्वज्वलनमेवच ॥ तिर्यग्गमनमप्यत्रगमनादेवलभ्यते ॥७॥ श्रीरामोजयति ॥ ५ ॥

नोर

दयइत्यर्थः ॥ अदृष्टंधर्माधर्मौश्रुतोनचतुर्विंशतित्वानुपपत्तिः चतुर्विंशतित्वमत्रापेक्षाबुद्धिविशेषविषयत्वंनसंख्याव्याघातःतस्यद्यपिकृपादिवल्लघुत्वमृदुत्वकठिनत्वा
दिकमपिअप्रसिद्धंतथापितेषांगुणान्तरंलघुत्वस्यगुरुत्वाभावेतर्भावात्मृदुत्वकठिनत्वयोस्तुअवयवसंयोगविशेषेंतर्भावात् एतेषांसर्वेषांगुणत्वजातिम
त्वद्रव्यकर्मभिन्नत्वेसतिसामान्यवत्त्वंवासामान्यलक्षणंगुणत्वजातिसिद्धिरग्रेवक्ष्यते ॥४॥ ॥५॥ कर्मविभजते उत्क्षेपणमितिकर्माणिपंचकानि तानि
उत्क्षेपणादीनीत्यर्थः तत्रउत्क्षेपणंऊर्ध्वदेशसंयोगहेतुःपातनं अवक्षेपणं अपकर्षणं अधःपातनं आकुंचनं अंगुल्यादीनांसंकोचसंपादनं प्र
सारणंसंकुचितस्यविस्तृतिसंपादकं गमनंनमेतद्भेदतुचतुर्भिन्नंदेशांतरसंचारादिरूपं एतेषांपंचानांकर्मत्वजातिमत्त्वंसंयोगभिन्नत्वेसतिसंयोगासम
वायिकारणत्वंवासामान्यलक्षणंभ्रमणादिपंचत्वेनसंख्याव्याघातःकिंतुप्राग्वद्बोध्यं ॥६॥ ननुभ्रमणादीनामपिसत्वात्कथंपंचैवकर्माणितत्राह भ्रमणमिति ॥
चकारात्तिर्यक्संयोगादिजनकानांभ्रमणादीनामुक्तचतुष्टयभिन्नत्वेपिगमनएवांतर्भावइतिभावः ॥७॥ ॥५॥ ॥५॥ ॥५॥ श्रीराम ॥

कर्कावलि

सत्ताऽनुगतमतिरनुमानतया प्रमाणं तदाकारस्तु घटो घट इत्याद्य-
२ नुगत मतिः अनुगतधर्मसाध्या अनाधिता नुगतमतित्वात्

१ सामान्यमित्यर्थः तथा च सामान्यपदेनैव धर्मिणं गृहीते धर्मस्यैकत्वे विवक्षितेऽनुगतमतिविषयत्वे च विवक्षिते नित्यमेकमनेकसमवेतमिति तल्लक्षणं तथा सत्तात्वद्रव्यं

सामान्यं द्विविधं जातिः सामान्यमिति समानानामेकाकारप्रतीतिजनकं सामान्यं घटमेऽड ~~तमतिश्च माचको जोसकमवच्छिन्नेह द्विविधं नतु भिन्नत्वे सत्यनेकसमवेतत्वे धर्मो~~
~~नु वद्विद्वीधर्मा उपाधिः सोपि सर~~ रतेन सामान्यं भावरूपं नास्य एकत्वं घटादावोहरूपं नु घटे अभावस्यास
रूपत्वानंगीकारादिति बोद्धमतं निरस्तं भिन्नघटानामपि परस्परं भिन्नत्वमेवास्ति नतु नन्वेकत्वं अथ घटत्वावच्छिन्नत्वेनैकत्वं घटभिन्नत्वे तद्भेन घटे स्थितिश्चेत्
सिद्धं तर्हि घटत्वेनेति न किंचिदेतत् तत्र जातिं विभजते द्विविधमिति अनेन त्रिविधमिति मतं केषांचिन्नसम्यगिति ध्वनितं परं व्यापकं अपरं व्याप्यं तथा च परापरं
२ अतिरिक्तं नास्त्येवं सामान्यमुक्तेरिति भावः तत्र परमाह द्रव्यादित्रिकसत्तावृत्तिः सत्तेत्याद्यभावः सत्तारूपा जातिः परतया उच्यते परं सामान्यमिति कथ्यते यतो द्रव्यादित्रि
कवृत्तिः द्रव्यं सत् गुणः सन् कर्म सदिति अनुभवात् द्रव्यगुणकर्मवृत्तित्वाच्चाधिकदेशवृत्तित्वमेव परत्वं तद्भेन च द्रव्यादिमात्रवृत्तिः द्रव्यत्वाद्यपेक्षया सत्ता
या एवास्तीति सा परतयोच्यत इत्यर्थः ॥ ननु सत्तायाः द्रव्यादित्रिकमात्रवृत्तित्वाभ्युपगमे कथं जातिः सत्तीयादिरपि तीति चिन्तितेवेत् एकार्थसमवायादिरेहि
अस्तिबाधकप्रवरसमवायेन तदभ्युपगमात् जात्यादौ च जात्यादेर्बाधकादिना निरासादित्यन्यत्र विस्तरः ॥८॥ अपरमाह परभिन्नाहिति सत्ता

॥ सामान्यं द्विविधं प्रोक्तं परं चापरमेव च द्रव्यादित्रिकवृत्तिस्तु सत्तापरतयोच्यते ॥ परभिन्ना तु या जातिः सैवापरतयोच्यते ॥ द्रव्यत्वादिकजा
॥ तिस्तु परापरतयोच्यते ॥९॥ व्यापकत्वात्परापि स्याद्व्याप्यत्वादपरापि च ॥ अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥१०॥ श्रीरामो जयति ॥

भिन्ना घटत्वादिका या जातिः सैवापरतयोच्यते अपरं सामान्यमिति कथ्यते न्यूनदेशवृत्तित्वमपरत्वं तच्च बहुविषयवृत्तिसत्ताद्यपेक्षयाल्पविषयैकदेशघट
दिमात्रवृत्तिघटत्वादीनामिति तदपरं सामान्यं कथ्यते इति भावः ॥ परत्वापरत्वयोः समावेशेन परापरं सामान्यमाह ॥ द्रव्यत्वादिकेति पृथ्वापरतयापृथिवी
त्वापेक्षया परा सत्तापेक्षयाऽपरा ॥९॥ तत्र हेतुमाह व्यापकत्वात् पृथिवीत्वापेक्षयाऽधिकदेशवृत्तित्वात् यतः पृथिवीत्वं पृथिव्यामेव द्रव्यत्वं तु पृ
थिवीजलतेजःप्रभृतिषु नवद्रव्येषु व्याप्यत्वात् सत्तापेक्षया न्यूनदेशवृत्तित्वात् यतः सत्ता द्रव्ये गुणे कर्मणि च द्रव्यत्वं तु द्रव्य एव एवं पृथिवीत्वमपि
घटत्वाद्यपेक्षया परं द्रव्यत्वापेक्षयाऽपरं द्विविधस्यापि सामान्यस्य नित्यत्वे सत्यनेकसमवेतत्वं लक्षणं ज्ञातव्यं तत्र संयोगेऽतिव्याप्तिवारणाय
नित्यत्वं परमाणुपरिमाणादावतिव्याप्तिवारणायानेकेति अभावेऽतिव्याप्तिवारणाय वृत्तिसामान्यं विहाय समवेतत्वमिति पदत्रयं तद्धि स्वरूप तथा नु
गतो धर्मोऽत्र लक्षणघटेरप्यस्त्येव तत्परत्वं यथा संबंधत्वादिकमित्यादि विस्तरः ॥ विशेषं लक्षयति अन्त्य इति अत्रेऽवसाने स्वस्य अस्य सजातीयव्यावर्तकान्त

दामकुसुमबुद्धिरिति
पघटे घटे घटो घट इति अनुगतमति ... सामान्यजन्या अनुगतमतित्वात् दामकुसुमबुद्धिवत् ...

१२ आधाराधेयभावान्यसंबंधविवक्षेसम्बन्धः नचैवमप्रयोजकं कपाले पटो नास्तीति प्रतीतिवत् नाऽपि पट[illegible] नास्तीति प्रतीत्योः सपक्षविरोधे तद्विरुद्धा
प्रिनिबंधप्रत्याधाराधेयभावभावसंबंधेन पटवत्ताधीः प्रतिबंधिके तिलयापि वाच्यं तन्न संभवति तंतौ संयोगेनापि पटो नास्तीति प्रतीत्यनुदयप्र
संगात् तस्मात्प्रतिबंध्यप्रतिबंधाः ॥ सो ॥ भावनिर्वचनाय संयोगइव समवायो प्यावश्यक इति भावः ॥ १२ ॥

रसमप्रेममवतिव्यावर्त्तकतयासिद्धः तीर्थंकरेयस्यविशेषो नास्तिप्रतिव्यक्तिनियतः स्वतोव्यावृत्त इति यावत् सर्वसाधारणैकत्वे सामान्यरूपतापत्त्यास्य
तोव्यावृत्तत्वाभावेच गुणोऽर्थन्तर्भावश्च सत्ता स्वासिद्धिप्रसंगोऽव्यावृत्तसिद्धिप्रसंगश्च स्यादिति भावः ॥ प्रतिव्यक्तिनियत इत्यनेन सामान्यादिभ्यो भेदः स्वतोव्या
वृत्त इत्यनेन सामान्यवद्भेदे सत्यर्थः तथा चोक्तत्वमेवास्य लक्षणं प्रमाणसूचनाय नित्यद्रव्यवृत्तिरितिनित्यद्रव्येषु परमाण्वादिष्वित्यर्थः नित्यद्रव्येषु वर्त्तनं यस्य ताद
शः घटादीनां द्व्यणुकपर्यन्तानामवयविनां परस्परमवयवभेदाद्भेदः सिद्ध इति परमाणूनां तु न तथा निरवयवत्वात् तथा चान्यथानुपपत्तिप्रमाणं नित्य
द्रव्येष्वेकस्मिन् परमाणौ चैकैकविशेषो व्यावर्त्तकस्यावश्यकः सोऽप्यतद्रूपस्वतोव्यावृत्तेः स्वयमप्यावृत्तस्य परव्यावर्त्तकत्वायोगात् सामान्यतो नित्य
द्रव्येत्युपादानादाकाशादिनित्यद्रव्येष्वपि परस्परभेदसिद्धये लाघवाद्विशेषएकोऽस्ति इति ज्ञापितमिति स्तोकविस्तरः ॥ १० ॥ समवायस्य लक्षणमाह
घटादीनामिति ॥ घटादीनामवयविनां कपालादावयवेषु द्रव्येषु क्वचित्तेषु गुणकर्मणोः गुणानां कर्मणां च तेषु गुणकर्मसु जातेर्द्रव्यत्वगुणत्वकर्म
त्वादिजातेः चकारान्नित्यद्रव्येषु विशेषपदार्थस्य संबंधः इह कपाले घटोस्ति नीलमुत्पलं देवदत्तोऽगच्छति प्रत्यक्षत्व जातिमानयं विशेषवान् परमाणुरित्यादि

"घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः ॥ तेषु जातेश्च संबंधः समवायः प्रकीर्तितः ॥ ११ ॥ अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ॥ प्राग

॥ का ३३

शिष्टबुद्धिजनकः पदार्थः तथा चावयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्नित्यद्रव्यविशेषयोश्च यः संबंधो लाघवादेको नित्यः स एव समवाय
इत्यर्थः एकत्वेनाननुसंख्याबाधात् किं तु स्वरूपतः पदार्थविभाजकोपाधिमत्त्वातिरिक्तो भेदश्चानुत्पत्तेः समवाय इत्याभावात् समवायो नाम कपाले घटः समवेतः पटः तंतुषु
समवेत इत्यादि शब्दप्रयोगस्वरूपलक्षणया ॥ तुल्यक्रिया जातिविशिष्टबुद्धिः विशेष्यविशेषणसंबंधविषया विशिष्टबुद्धित्वात् दंडीपुरुष इति विशिष्टबुद्धिवदिति
अनुमानेन संयोगादिवाधसहकृतमिति कल्पनेन तया वा लक्षणं तस्य नित्यत्वे सति संबंधत्वं संयोगादारणाय सत्यंतं कालादिवारणाय विशेष्यसंबंधि
॥ अनुमानेन संयोगादिवत्सिद्धिः विस्तरः ॥ ११ ॥ अभावं विभजते ॥ अभावस्त्विति ॥ इत्यादि भावप्रकारेणास्ति स एव द्विधा द्विप्रकारः एतत्कथनं घटादि
भिन्नत्वेन संबंधसंकेतादित्याह स्वां विस्तरः ॥ घटत्वं नास्तीति प्रतीतिर्तो घटः पटो नेत्यादिप्रतीतेरिति ज्ञातीयत्वात् आधेयता संबंधेन घट[illegible]भावः
घटत्वाद्यवच्छिन्नाभावेन्तर्भावनिरासायं पटे घटत्वं नास्तीति प्रतीतिर्तो घटः पटो नेत्यादिप्रतीतेरिति ज्ञातीयत्वात् संसर्गान्योन्याभावभेदतः संसर्गाभावत्वं अन्योन्याभावभिन्नाभाव
त्वेनेति प्रतीतेर्न्नीयमानत्वेन तस्याश्रयत्वाद्भाववत् संसर्गाभावान्योन्याभावभेदादित्यर्थः संसर्गाभावत्वं अन्योन्याभावभिन्नाभाव
त्वं अन्योन्याभावत्वं तु भेदत्वं तद्धेतुरिदं न भवतीति प्रतीतिवलाद्दरवलोपाधिः तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं वा तत्रान्योन्याभावस्यैकविध

घटत्वे ३

यथा घटस्तैरेवतेषां व्यावृत्तिसंभवात् ४

४ नापि प्रत्येकवृत्तिरूपादितः ग्रन्थोऽप्याश्रयात् ॥ प्रव्यावृत्तस्य व्यावर्त्तकता
योगात् स्वाश्रयेतरस्वस्वव्यावृत्तिस्वेनैव स्वाश्रयं व्यावर्त्तयतीति नाविरू
पादयः स्वतो व्यावृत्ताः प्रमाणाभावात् सामान्याश्रयस्य स्वतो व्यावृत्तत्वा
दर्शनात् अत एव परमाणवोऽपि न स्वतो व्यावृत्ताः तस्माद्धर्मिग्राहकप्र
माणं स्वतो व्यावृत्तत्वेन सिद्धा विशेषा एव नित्यद्रव्यव्यावर्त्तकास्तत्रैवे
ऽव्यावृत्ताः कथं व्यावर्त्तका इति वक्तुं न शक्यते प्रसिद्धदशायामाश्रयासि
द्धेः सिद्धदशायां स्वतो व्यावृत्तत्वेनैव सिद्धत्वात् परमाणुरूपादिषु च वि
शेषा स्वीकारो विशे

६ प्रागभाववत्ताप्यध्वंसोऽप्यत्यन्ताभाव एव च॥१२॥ मू॰

तात्त्विकमाशासंभवात्संसर्गाभावं विभजते प्रागभाव इति। घटाद्युत्पत्तेः प्राक्कालवर्त्ती अभावः इह कपाले घटो भविष्यतीति प्रत्ययसमालम्बनो घटोत्पत्त्यनन्तरम
विद्यमानस्तथा चास्य विनाश्यभावत्वं लक्षणमिति सूचितम्। तथा ध्वंसः मुद्गरप्रहारादिना घटो ध्वस्तो विनष्ट इत्यादिप्रतीतिसिद्धो नाशपदध्वंसपदाभिधेयस्त
था चास्य जन्याभावत्वं लक्षणमिति सूचितम्॥ अपि च अत्यन्ताभावः अत्यन्तं सदाऽभावो वायौ रूपं नास्तीत्यादिप्रतीतिसिद्धस्तथा चास्य नित्यसंसर्गाभावत्वं लक्ष
णमिति सूचितम्। संसर्गाभावत्वं प्रागभावत्वध्वंसत्वान्यतरवदेवेति चेत्, नित्य।१२। एवं प्रागभावे ध्वंसात्यन्ताभावयोरव्याप्तेः अप्राप्तेः प्रागुक्तं त्रैविध्यमि
त्यनेन संसर्गाभावस्य त्रय एव विभागाः अतस्तु तुर्यो विभागो नास्ति मानाभावादिति ज्ञापितं॥ अत्रायं विशेषः। अत्यन्ताभावोऽन्योन्याभावो भावस्य द्वयं इति धर्मावच्छिन्न
प्रतियोगिताको विशिष्टधर्मावच्छिन्नप्रतियोगिताकोऽभयमिन्नो च... घटत्वादौ घटो न घटवान् घटो न घटत्वादिप्रतीतिसाक्षिकौ। द्वितीयो केवलपु
रुषवति केवलदण्डवति वा दण्डीपुरुषो नास्ति पुरुषो न दण्डीति प्रतीतिसाक्षिकौ उभयभिन्नौ च द्विविधौ सामान्यधर्मावच्छिन्नप्रतियोगिताकौ वि
शेषधर्मावच्छिन्नप्रतियोगिताकौ च। तत्राद्यो रक्तो नास्ति घटो वह्निर्नेति धीविषयौ द्वितीयो न दण्डिर्नास्ति न दण्डीति धीविषयौ तथा च विशेषाभा

॥ एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते॥ [illegible]

वत्त्वसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य व्यासज्यवृत्तेरभ्युपगमात्... [illegible] लावच्छिन्नप्रतियोगिताकत्वेन ताहशेन विशेषाभावकूटस्येव सामान्याभावधीवि
षयत्वसंभवात् सामान्याभावे मानाभाव इति वाच्यं संज्ञामात्रभेदात् ताहशसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य तादृशेन सामान्याभावरूपत्वादि सास्तां वि
स्तरः तत्रापि भेदः केवलान्वयी च अत्यन्ताभावस्तु पुनर्द्विविधः केवलान्वयी तद्भिन्नश्च तत्राद्योऽव्याप्यवृत्तेः संयोगस्याभावो गगनादेश्च अन्यस्तु व्याप्यवृत्ते
रितिभेदो घटादेः तेषां व्याप्यव्याप्यवृत्ते सेरभावो व्याप्यवृत्तिरेव भेदस्तु व्याप्यवृत्तिरेव व्याप्यवृत्तिरिति तन्न्यायः अत्यन्ताभावस्यात्यन्ताभावः प्रतियोगिस्वरूप
इति प्राचः प्रतितिष्ठन्ते तन्न्याः भेदात्यन्ताभावः प्रतियोगितावच्छेदकस्वरूपः भिन्नो भेदोऽनुयोगिताक [illegible] द्विक स्वभेद
वः भेदभेदस्तु तिरिक्तः एवं नव्ये यम नवस्था दोषायप्रामाणिकत्वात् प्रागभावः ध्वंसयोस्तु सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं नवा संसर्गावच्छिन्नप्रतियो
गिताकत्वं मानाभावात् किंतु विशेषधर्मावच्छिन्नसंसर्गेनावच्छिन्नप्रतियोगिताकत्वमेवेति संक्षेपः। ननु सर्वेषामभावानामधिकरणात्मत्वमेवास्तु किमिति
रिक्तेन पदार्थेनेति चेत् अनन्ताधिकरणात्मकत्वे गौरवप्रसङ्गात् सर्वगतता वा धाराधेयभावप्रतीत्यपात् तस्मादिति तत्त्वातिरूपा पाद्यभाव नानाऽप्रसक्ते

के प्रत्यन्योन्याभावस्तेनोत्तना

५ शाखायां वृक्षः कपिसंयोगी न मूले इति प्रतीतेर्भेदोऽप्य ५

१५ पत्रादिः॥

सर्वपदार्थविभाजकोपाधिः तद्वत्त्वादि इत्यादि।

जला १

६ स्तौ अयं प्रतियोगिकान्योन्याभावसमानाधिकरणपदार्थविभाजकोपाधिमत्त्वं भातिवेदं इत्यादिपंचसु इत्यादि प्रतियोगिकान्योन्याभावे नइयांतरसंदेइष्यवाादेः समा
ना धिकरणत्वात्समवायेतु न यातिसमवायान्योन्याभावस्य समवाये ऽभावात्। इत्यादौ सत्वेपितत्र समवायत्वाभावात् ६

नापत्तेश्चतद्धिकरणानां वायुप्रभृतीनामयोग्यत्वाद्दिग्यास्तां विस्तरः साधर्म्यादिज्ञानं विना सम्यक्पदार्थज्ञानासंभवात्तेषां साधर्म्यविशिष्टोऽनि
रूपयिष्यन् प्रथमसुपदर्शितेष्वितानिरूपितानां सप्तानामाह॥ सत्तानामिति॥ द्रव्यगुणकर्मसामान्यविशेषसमवायाभावानां साधर्म्यसमानोध
र्मः ज्ञेयत्वं ज्ञानविषयत्वं प्रमेयत्वादिकं इत्यर्थः ज्ञेयत्वं वाच्यत्वादेः परिग्रहः अभिधेयत्वं पदशक्यत्वं वाच्यत्वं शक्यत्वं प्रत्येकवाच्यत्वं॥१३॥ तत्र द्रव्यादिपंचाना
मः ज्ञेयत्वे ज्ञानविषयत्वं प्रमेयत्वादिकं इत्यर्थः समवायस्तु
माह॥ द्रव्यादय इति॥ द्रव्यमाद्यं येषां ते द्रव्यगुणकर्मसामान्यविशेषाः पंच ते भावरूपाः संतोऽनेके भवंति समवायवंतश्च भवंतीत्यर्थः समवायस्तु
भावो विनाने कः प्रागेकत्वसाधर्म्यात्‌ अभावस्त्वनेकोपि न भाव इति तदुभयनिरासः तत्राभावत्वे सत्यनेकत्वं समवायवत्त्वं च पंचानां साधर्म्यमित्यर्थः
नेकत्वमत्र न संख्या गुणहास्व्याप्तेः किंतु विभाजकोपाधिम ता
पृथिवीजलादीनां परस्परं भेदात्‌ समवायेति समवायवत्त्वं च समवायवत्त्वे सामान्यविशेषयोरव्याप्तेस्तयोः समवेतशून्यत्वादिति वाच्यं

समानाम पिसाधर्म्यमिह पलादिकमुच्यते॥१३॥

॥ द्रव्यादयः पंच भावा अनेके समवायिनः॥ सत्तावंतस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः॥१४॥ श्रीशिवमाणक

सामान्यविशेषप्रतियोगिकसमवायस्य प्रतियोगितासंबंधेन सामान्यविशेषयोः सत्त्वात्॥ द्रव्यादित्रयाणामाह॥ सत्तावंत इति॥ आद्यास्त्र
यः द्रव्यगुणकर्माख्याः सत्तावंतः समवायेन सत्ताजात्याश्रयाः द्रव्यत्वाद्द्रव्यगुणकर्मणामेवोत्पत्तिदर्शनात्‌ कार्यकारणैकत्वे तयोः क्रियावत्वात्र
साधारणी जातिः सत्ता सत्तादिति व्यवहारबीजं समवायेन द्रव्यगुणकर्मणां त्रयाणामेव जात्यादौ तु जातिः सतीत्यादि व्यवहारे हेतुरेकार्थसमवायेन त त
श्च समवायेन सत्तावत्त्वं त्रयाणां साधर्म्यमदुष्टं गोत्वं गुणादीनां पंचानामाह॥ गुणादिरिति॥ निर्गुणक्रियः निर्गते गुणक्रिये यस्मात्‌ तादृशो गुण

या शून्यः किं शून्यश्चेत्यर्थः गुणकर्मसामान्यविशेषसमवायानां पंचानां गुणशून्यत्वं क्रियाशून्यत्वं च साधर्म्यमित्यर्थः गुणशून्यत्वं गुणवद्वृत्तिधर्म
६ २ २ शून्यत्वं क्रियाशून्यत्वं क्रियावद्वृत्तिपदार्थविभाजकोपाधिमत्त्वं तेन प्रथमक्षणे घटादेर्निर्गुणत्वेपि गगनादेः सर्वदा निष्क्रियत्वेपि न तत्राति व्याप्तिः गु
णवति क्रियावति चाविद्यमानस्य द्रव्यत्वस्याभावसत्त्वात्॥१४॥ ॥१५॥ ॥१५॥ श्रीरामो जयतीति॥१५॥

गुणत्वादेर्गुणादिष्वेव६

(कार्यतावच्छेदकतया कारणतावच्छेदकतया चेत्यर्थः २)

निर्गुणत्वे सति कर्मभिन्नत्वे सति सामान्यवत्त्वं वा गुणत्वात् २४

जात्यंतरसाधारणं ३ तर ३

सामान्यादीनां चतुर्णामाह। सामान्येति। जातिरहिता इत्यर्थः। ते जातिविशेषसमवायाभावाः सामान्येन जात्या रहिताः जातिरहितत्वं तेषां साधर्म्यमित्य

र्थः। अयं भावः। द्रव्यादित्रये कार्यकारणभावादेव जातिसिद्धिः साधिता तत्र सामान्यादौ च तदभावादनवस्थादिदोषप्रसंगाच्च न जातिः। तथा

हि। सामान्ये यदि सामान्यं स्यात्तदा तदपि सामान्यमविशेषात् सामान्यवत् स्यादिति सामान्यपरंपराप्रसक्त्याऽनवस्था। विशेषेषु सामान्यस्य

हि। सामान्यं यदि सामान्यवत् स्यात्तदा तदपि सामान्यमविशेषात् सामान्यवत् स्यादिति सामान्यपरंपराप्रसक्त्याऽनवस्था इति सामान्यवत् अस्य कल्पे

मान्यरतः एवं विशेषोपि न सामान्यवान् तथा सति तुल्यतया विशेषत्वस्य सिद्धिप्रसंगात्। एवं समवायोपि न सामान्यवान् समवायस्यैकत्वे २५

न समवायत्वस्यैकव्यक्तिकतया जातित्वासंभवात् तथा सति समवायपरंपराप्रसक्त्याऽनवस्थाप्रसंगाच्च। एवमभावोपि सामान्य

वान् समवायाभावात्। न च तत्रानुगतव्यवहारानुपपत्तिः तदुपाधिनैव तत्संभवात्। तस्मात् द्रव्यादित्रयमेव जातिमदिति सिद्धम्॥ त

त्कारणत्वं केषां तदाह। पारिमाण्डल्येति। परिमण्डलत्वं परमाणुपरिमाणं तद्भिन्नानां सर्वेषां कारणत्वं साधर्म्यमित्यर्थः। लिंगत्वात्

कारणता वादिनां नैयायिकानां मते तत्राप्रसिद्धो वो ध्यं। न्यायमते लिंगकारणतावादिनां वैशेषिकाणां नयेतु परमाणुपरिमाणलिंगकानुमि

कारणतावादिनां नैयायिकानां मते तस्मात् दोषः

॥ सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः। पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतं ॥ १५॥ श्रीरामः

॥ अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता॥ कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितं ॥ १६॥ श्रीरामः

घं ४

नीपरमाणुपरिमाणस्यापि हेतुत्वमायाप्याक्षेत्यर्थः। तथा सति परिमाणत्वस्यापि भिन्नद्व्यणुकादिपरिमाणमेव ज्ञात्वा धर्मातिरिक्तभावकार्यं प्रति कारणत्व

मेव परमाणुपरिमाणस्यापि हेतुत्वमायाप्याक्षेत्यर्थः। तथा च परमाणुपरिमाणस्य न किंचित् प्रति कारणत्वं यस्य योग्यतावच्छेदकयोग्यताः॥ १५॥ किं कारणत्वमित्याकांक्षायां प्रकारा

मियर्थो ऽवसेयः। आदिपदेन परममहत्त्वं अन्त्यावयविरूपरसगंधस्पर्शसंख्यापरिमाणादयो बोध्याः॥ १५॥ किं कारणत्वमित्याकांक्षायां ब्रह्मकाण्डं

नियर्थो ऽवसेयः। आदिपदेन परममहत्त्वमन्त्यावयविरूपरसगंधस्पर्शसंख्यापरिमाणादयो बोध्याः। अन्यथासिद्धिशून्यत्वे सति नियतपूर्ववर्तित्वं कारणत्वमिति। तत्र युक्तमतिरिक्तकारणत्वं कुत्रापि प्र

तस्य दुर्वचत्वात् लाघवादिद्दमस्य कारणमिति धीविषयतयासिद्धमिति तित्त्वमेव तदित्यवदेशिनः। तन्न युक्तं अतिरिक्तकारणत्वकल्पनापेक्ष

तरस्य दुर्वचत्वात् लाघवादिदमस्य कारणमिति धीविषयतया सिद्धत्वात्। आदिपदेन कल्पनस्यापि तत्त्वादित्याशयवानाह तदाह। अन्यथेति। अनुपदमेव वक्ष्यमाणान्यथासिद्धिशून्यत्वे सति

यातत्वे सति नियतपूर्ववर्तित्वं धर्मवत्त्वं हि कल्पनसौकर्यादित्याशयवानाह। अन्यथासिद्धत्वशून्यत्वविशिष्टकार्यनियतपूर्ववर्तिजातीयत्वं कारण

स्य दण्डादेर्यन्नियतपूर्ववर्तित्वं ताकार्यनियतपूर्ववर्तिजातीयतां कारणत्वमित्यर्थः। अन्यथासिद्धत्वशून्यत्वविशिष्टकार्यनियतपूर्ववर्तिजातीयत्वं कारण

त्वमिति यावत्। तेन तृणादेः वन्हिकारणत्ववारणाय अन्यथासिद्धिशून्यत्वं। अन्यथासिद्धिनियतपूर्ववर्तित्वाभावाद्विशेषे तत्र समवा

स्थाने अन्यथासिद्धिशून्यस्य नियतपूर्ववर्तित्वं नियतपूर्ववर्तित्वात् ततः पूर्ववर्तीति स्वरूपयोग्यवनस्थदण्डादिसंग्रहः

न्दिनो ऽनन्यथासिद्धत्वमाहत्य वर्तिव्याप्ति वारणाय नियतेति। रासभादेः कदाचित्कार्यनियतपूर्ववर्तित्वेपि नियतत्वाभावात् स्वरूपयोग्यवनस्थदण्डादिसंग्रहः

॥ १६॥ १ (चरमसाद्धेपि (भाविः

यत्किंचिद्व्यक्तिकार्यनियतपूर्ववर्तित्वस्य गुणादौ सत्त्वात् तस्य कारणत्वमित्यभिप्रायः तस्य कारणत्वस्य

[illegible] रू२५ पत्र ५

त्रैविध्यमेव दर्शयति। समवायीति स्पष्टं ॥१७॥ समवायिकारणमाह। यत्समवेतमिति॥ कार्यप्रागभावप्रतियोगि घटपटादिकं यत्समवेतं भवति यस्मिन्कपा
लादौ समवेतं सदुत्पद्यते समवाये नोत्पद्यते तत्कपालादिकं तस्य कार्यस्य समवायिकारणं बोध्यमित्यर्थः॥ असमवायिकारणमाह। तत्रासन्नमिति॥ तत्र समवायि
कारणे आसन्नं समवायेन स्वसमवायिसमवेतत्वसंबंधेन वा संबद्धं यज्जनकं तत्कार्यस्य असमवायिकारणमित्यर्थः। समवायिकारणे इति व्याप्तिकारणयासन्नमि
ति तंतुत्वादावतिव्याप्तिवारणाय जनकमिति। निमित्तसमवायेन यथा तंतुतंतुसंयोगः पटस्य पटसमवायिकारणे तंतौ तंतुसंयोगस्य समवायेन सत्त्वात् पटस्य
जनकत्वात् स्वसमवायिसमवेतत्वसंबंधेन यथा तंतुरूपं पटरूपस्य समवायिकारणे पटे तंतुरूपसमवायिनि तंतौ समवेतत्वात् तंतुरूपस्य स्वसमवायिसमवेतत्वसंबं
धेन विद्यमानत्वात् पटरूपस्य जनकत्वात् एवं सर्वत्र यथायोग्यमवगंतव्यं॥ आभ्यां समवायिकारणासमवायिकारणाभ्यां परं भिन्नं यज्जनकं तत्
तृतीयं निमित्तकारणं यथा तुरीवेमादिकं वस्तुतः कारणमेदगर्भनिमित्तकारणलक्षणं किंतु कारणतामेदगर्भं समवाय्यसमवायिकारणता न्यकारणताव त्वं निमि
त्तकारणत्वमिति यावत्। तेनात्मनो ज्ञानादिकं प्रत्यसिद्धं निमित्तोपादानत्वेपि न हानिः॥१८॥ अन्यथासिद्धत्वशून्यस्य कारणत्वमुक्तं अन्यथासिद्धत्वमाह

॥ समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वं ॥ एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वं॥१७॥ यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजन
॥कं तत्॥ तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात्॥१८॥ येन सह पूर्वभावः कारणमादाय वा यस्य। अन्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानं॥१९॥

द्वितीयं १

तत्राद्यमाह येनेति। येन लघुधर्मसंबंधादिमता दंडादिना सह यस्य पटादेः कार्यं प्रति पूर्वभावः कार्यपूर्ववृत्तिता तदन्यथासिद्धमित्यर्थः। येन रूपेणान्यत्वा
यं प्रति कारणस्य पूर्ववृत्तित्वं गृह्यते तत्कार्यं प्रति तद्रूपमन्यथासिद्धं यथा घटं प्रति दंडे दंडत्वमिति यावत्। द्वितीयमाह। कारणमादायेति यस्य स्वतंत्रान्वयव्यति
रेकरहितस्य कारणमादाय गृहीतेन यत्कार्यं प्रति पूर्वभावोऽन्वयव्यतिरेकौ तत्कार्यं प्रति तदन्यथासिद्धं यथा घटं प्रति दंडरूपादिकमित्यर्थः॥ तृतीयमाह॥ अ
न्यं प्रतीति। यत्र यस्य अन्यं प्रति यत्कार्यकारणान्यं प्रति पूर्वभावे पूर्ववृत्तित्वे ज्ञाते एव पूर्वभावविज्ञानं यत्कार्यं प्रति पूर्ववृत्तित्वग्रहस्तस्य तत्रान्यथासिद्धत्वं यथाकाश
स्य घटे आकाशत्वेन कारणत्वेऽन्यथासिद्धत्वं आकाशत्वस्य शब्दसमवायिकारणत्वरूपत्वात् घटकारणान्यथा शब्दपूर्ववृत्तित्वं ज्ञात्वेव घटपूर्ववृत्तित्वं ज्ञात
त्वमित्यन्यथासिद्धत्वं॥१९॥ ॥६॥ ॥९॥ ॥६॥ ॥५॥ त्वमित्यन्यथा ॥६॥ श्रीराम॥७॥

४ कारणत्वं प्रतीतीति व्याख्यानाद्दिक्। तद्भिन्नत्वं चतुर्थमाह। जनकं प्रतीति। यस्य यत्कार्यजनकं प्रति पूर्ववर्त्तित्वमपरिज्ञाय न। किन्तु पूर्ववर्त्तित्वं ज्ञात्वैव यस्य तत्कार्यपूर्ववर्त्तित्वं गृ
ह्यते तस्य तत्रान्यथासिद्धत्वं। यथा कुलालजन्यघटादौ कुलालेन ... कुलालपितुः। तत्र ह्यस्य साक्षाद्धेतुत्वेन कुलाले घटपूर्ववर्त्तित्वं गृहीत्वैव तद्द्वारा तस्य तद्
हात। न चैवं व्यापारेणान्यथासिद्धिर्लोकेऽन्यथासिद्ध्यापत्तिः। यत्र जन्यस्य पूर्ववर्त्तित्वं गृहीत्वैव जनकस्य तेन हेतुत्वेनैव जन्येन जनकस्यान्यथासिद्धत्वं। यत्र तु जनकस्य
पूर्ववर्त्तित्वं गृहीत्वा जन्यस्य तद्ग्रहस्तत्र जन्येन जनकस्यासिद्धत्वमिति सिद्धान्तात्। स्वर्गं प्रति स्वजन्यापूर्वद्वारा यागादेः कारणत्वस्य प्रमाणसिद्धत्वादित्या
स्तां विस्तरः। पञ्चममाह। अतिरिक्तमिति। यतः यदा यत्र कार्यं तदा तत्र पूर्वकाले विद्यमानत्वमिति नियमविशिष्टः आवश्यकः अवश्यं क्लृप्तः पूर्वभावो ऽन्यथाख्याति
स्तद्भिन्नत्वं यस्य तादृशात्तदादिदण्डादितो यत् अतिरिक्तमिति तदन्यथासिद्धं यथा घटं प्रति रासभादिकं अवश्यक्लृप्तनियतपूर्ववर्त्तिभिर्दण्डादिभिरेव तत्संभवे
तदतिरिक्तं रासभादिकं कदाचित्सहभूतं न कारणं व्यभिचारित्वादिति यावत्॥२०॥ एतानेव गुल्लयति। एते पञ्चेत्यादिना। एतेषु पञ्चप्रकारेषु मध्ये असो
पञ्चमप्रकारः सर्वेषामेवैतेनैव गतार्थत्वात्॥ तथा हि। नियतावश्यकपूर्वभाविनो दण्डाद्दण्डत्वस्यातिरिक्तत्वादतिरिक्तत्वासम्भवे दण्डत्व दण्डरूपगगनकुलालपितृरासभादयोऽपीति ते

॥ जनकं प्रति पूर्ववर्त्तितामपरिज्ञाय न यस्य गृह्यते॥ अतिरिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः॥२०॥ एते पञ्चान्यथासिद्धा दण्डत्वादिक
॥मादिमं॥ घटादौ दण्डरूपादि द्वितीयमपि दर्शितं॥२१॥ तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः॥ पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ॥२२॥
॥ समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयं॥ गुणकर्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वं॥२३॥ श्रीरामो जयति॥५॥ ॥राम राम॥

सामस्यैवेत्यन्तर्गर्भवः॥२१॥२२॥ कारणत्वं लक्षयामाह॥ समवायिकारणत्वमिति। समवायेन कार्यं प्रति तादात्म्येन जनकत्वं लक्षणं समवायिकारणत्वं द्रव्यस्यैव न गुण
स्याप्यर्थः। एतेन जन्यभावसमवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धिरप्युपलभ्यते। द्रव्य एव समवायेन द्रव्यगुणकर्मणामुत्पत्तिदर्शनात्। तदर्थं समवा
यिकारणत्वं कस्य तत्राह॥ गुणकर्ममात्रवृत्तीति गुणकर्मणोरेव वृत्ति असमवायिहेतुत्वं कार्यसमवायिनि विद्यमानत्वे सति जनकत्वरूपमसमवायिका
रणत्वं समवायेन कार्यजातिसमकालादिना गुणक्रिययोरेव कारणत्वदर्शनादिति भावः॥२३॥ ॥५॥ श्रीरामो जयति॥ ५॥ ॥श्रीराम
श्रीराम जयराम जयजयराम॥५॥

कृत्वैवं कार्यतत्त्वविधानमित्यन्यत्र विस्तरः॥४

२ समवायसमवायघटितसामानाधिकरण्यान्यतरसंबंधेन २ ण्या

२८

शुभम्

तत्समवेतासमवेतविभागं दर्शयितुमन्ताह। अन्यत्रेति। नित्यद्रव्येभ्योऽन्यत्र पृथिव्यप्तेजोवायुपरमाणुभ्यः कालाकाशदिग्भ्यो भिन्नानां भावानां आश्रितत्वं वृत्तिम
त्त्वं न त्वात्र समवायेन बोध्यं तेन नित्यानां कालादौ वृत्तावपि न हानिः। तथा च नित्यद्रव्यान्यसमवेतभावत्वं नित्यद्रव्यभिन्नानां भावानां समवेतत्वं साधर्म्यमिति
लब्धं समवायस्यापि समवायात्मके स्वरूपसंबंधेन वर्तमानतया प्रदर्शितसाधर्म्यं समवायसाधारणमिति बोध्यमपि। क्षित्यादीनां नवानां लक्षणमाह।
क्षित्यादीनामिति॥ द्रव्यत्वं जातिरूपं दर्शितप्रमाणसिद्धा गुणयोगिता गुणाश्रयत्वं वा तद्द्वयं नवद्रव्यलक्षणमित्यर्थः॥ २४॥ परिच्छिन्नापरिच्छिन्नविभा
गं दर्शयितुमन्ताह। क्षितिरिति। पृथिव्यप्तेजोवायुमनसां परत्वमपरत्वं मूर्त्तत्वं क्रियावत्त्वं वेगवत्त्वं च साधर्म्यमित्यर्थः॥ मूर्त्तत्वमियत्तावच्छिन्नपरि
माणवत्त्वं तथा च क्षित्यादयः एव पंचामी परिच्छिन्नाः अन्ये त्वपरिच्छिन्ना इति बोधः॥ २५॥ केते परिच्छिन्नास्तत्राह। कालेति। कालाकाशात्मदिशां सर्व
गतत्वं सर्वमूर्त्तसंयोगित्वं संयोगेन सर्वमूर्त्तवृत्तित्वं च परममहत् परममहत्परिमाणवत्त्वं साधर्म्यमित्यर्थः। ह्रस्वदीर्घत्वस्यापि घटादौ घटत्वाभावेपि कालादेः परिमाण
वत्त्वं परमाण्वादेरिव द्व्यणुकत्वेन वस्तुनीयं प्रकृत्यैतद्बोधात् परममहदिति भावः॥ अतएवापरिच्छिन्ना इति भावः परिच्छिन्नापरिच्छिन्नेषु मध्ये कानि

॥ अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमुदाहृतं॥ क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता॥ क्षितिर्जलं तथा तेजः पवनो मन एव च। परापरत्वमूर्त्त
॥त्वक्रियावेगाश्रया अमी॥ २५॥ कालखात्मदिशां सर्वगतत्वं परमं महत्। क्षित्यादि पंचभूतानि चत्वारि स्पर्शवंति हि॥ २६॥ द्रव्यारंभश्चतुर्षु स्या
दथाकाशशरीरिणां॥ अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते॥ २७॥ श्रीराम॥

भूतपदवाच्यानीत्याह। क्षित्यादीति। पृथिव्यप्तेजोवाय्वाकाशाः पंचभूतानि भूतपदवाच्यानि बहिरिंद्रियग्राह्यवृत्तिगुणत्वव्याप्यजातिमद्विशेषगुणवत्त्वात्तस्य क्षिति
हि नात्मगुणा आकाशशब्दः। वायोः स्पर्शः। तेजसि रूपं। जले रसः। पृथिव्यां गंध इति दिक्। तत्रापि द्रव्योत्पत्तिनिर्वाहकं स्पर्शवत्त्वं चतुर्णामेवेत्याह। चत्वा
रीति। पृथिव्यप्तेजोवायवः स्पर्शगुणवंतः स्पर्शवत्त्वमेतेषां साधर्म्यमित्यर्थः॥ २६॥ एतेषु चतुर्षु साधर्म्यांतरमाह। द्रव्यारंभ इति। समवायेन द्रव्योत्पत्तिश्चतु
र्षु पृथिव्यप्तेजोवायुषु भवति द्रव्यसमवायिकारणत्वमेषां चतुर्णां साधर्म्यमित्यर्थः। द्रव्यसमवायिकारणवृत्तिद्रव्यविभाजकोपाधिमत्त्वमिति यावत्। तेन घट
स्य समवायेन द्रव्योत्पत्त्यभावेपि नाव्याप्तिः। तादृशजातेः पृथिवीत्वादिकस्य सत्त्वात्। विभूनां मध्ये विशेषमाह। अथाकाशेति। आकाशात्मनां अव्याप्यवृत्ति
विशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं च साधर्म्यमित्यर्थः। आकाशेऽव्याप्यवृत्तिः क्षणिकश्च विशेषगुणः शब्दः। आत्मनि तु ज्ञानेच्छादिस्तादृश इति लक्षण
समन्वयः। विशेषगुणरूपादयोपि सद्द्रव्यं घटादावपीत्यत उक्तमव्याप्यवृत्तीति। रूपादयस्तु न तथा किंतु संयोगादयस्तद्वत्त्वं कालादावपीत्यत उक्तं विशेषेति। वि

शेषगुणत्वलक्षणसांख्येयस्यतेऽव्याप्यवृत्तित्वं त्वेकदेशावृत्तित्वं तच्चावच्छिन्नवृत्तिकत्वं वैशिष्ट्यात् प्रत्यय इति धर्मम्न वृत्ति न्तस्याधिकरणवृत्त्यं तान्तरप्रतियोगित्वावच्छे
दकं वक्तव्यन्तातः शब्दरूपेषु मयत्वादि नारूपादेरभावस्य रूपाधिकरणघटादौ सत्वेपि रूपादेरव्याप्यवृत्तित्वं ईश्वरसंग्रहाय प्रतियोगितावच्छेदकेत्यादि तथाचतादृश
धर्मवद्विशेषगुणवत्त्वं प्रथमलक्षणार्थो ध्यं । तेन स्फटिकत्वं शब्दज्ञानादीनां योग्यविभुविशेषगुणानां तदोत्पन्नविभुविशेषगुणनाशकत्व नियमेन तृतीयक्ष
णवृत्ति ध्वंसप्रतियोगित्वं द्वेषस्योपस्थाबुद्धिभिन्नानां ज्ञानानां योध्यं अपेक्षाबुद्धेस्तु तृतीयक्षणे नाशात् । इथं च स्फटिकेतरस्य बुद्धेरपेक्षाबुद्धिभिन्नेत्वं ज्ञेयं तद्वै
निज्ञानिमद्विशेषगुणवत्वं द्वितीयलक्षणार्थो ध्यं । एतेन कस्यचिद्रूपादेः क्षणिकत्वेपि न हानिः ॥ ननु शब्दादिकालध्वायिनां ज्ञानधाराकल्पनापेक्षया ज्ञानस्य
ज्ञानस्यैतावत्कालस्थायित्वकल्पनमेवोचितं लाघवादिति चेन्न प्रतियोगितायां योग्यात्मविशेषगुणनाशं प्रति देवाधिकरणावच्छिन्नत्वपूर्ववर्तित्वसंबंधेन विशे
षगुणत्वेन कारणत्वाद्गुणानादेः सामग्रीबलाद्द्वितीयेपि क्षणे उत्पन्नज्ञानादिनानाशेन तादृशकल्पना याऽचितत्वादिति वदंति ॥२७॥ परिच्छिन्नानां मध्ये विशेषगुणम
हा ॥ रूपद्रवत्वेति । प्रथमास्पन्दः पृथिव्यप्तेजांसि रूपद्रवत्वप्रत्यक्षयोगिनः समवायेन रूपवन्तः द्रवत्ववन्तः विषयतया प्रत्यक्षवन्तश्चेत्यर्थः प्रत्यक्षवान्संयोगे न बहिरिन्द्रि

॥ रूपद्रवत्वप्रत्यक्षयोगिनः प्रथमास्पन्दनः ॥ गुरूणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥२८॥ आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ॥ यदुक्तं यस्य साधर्म्यं वैध
॥ र्म्यमितरस्य तत् ॥२९॥ स्यावोर्नवेकाद्गुरुत्वे जलस्थितिशालभ्य तोयवर्तु दिक्कालयोः पञ्च षडेवावेरसे मनसस्तथैव च ॥३०॥ [illegible] स्पर्शादयो

त्यजन्यं ग्राह्यं तेनात्मनो रूपादेश्च प्रत्यक्षत्वेपि न तत्रातिव्याप्तिः आत्मनो बहिरिन्द्रियेत्वरूपादेश्च संयोगेनाप्रत्यक्षत्वात् । गुरूणीति द्वे पृथिवीजले पृथिवी जलयोर्गुरु
त्ववत्वं रसवत्वं च साधर्म्यमित्यर्थः द्वयोः पृथिवीतेजसोः नैमित्तिकः तेजः संयोगजन्यः द्रवः द्रवत्वं तत्र पृथिव्यां घृतादौ तेजसि सुवर्णादौ नैमित्तिकद्रवत्वं वृत्तिद्रवत्वव्या
प्यजातिमत्वं तयोः साधर्म्यमित्यर्थः ॥ तेन न घटे व्याप्तिः ॥२८॥ आत्मेति आत्मानश्चेतना जीवाः ईश्वरश्च भूतवर्गः पृथिव्यप्तेजोवायुराकाशानि विशेषगुणयोगिनः
समवायेन विशेषगुणवंतः तत्र ज्ञानादिगुणवत्वमात्मनां रूपादिगुणवत्वं पृथिव्यादीनां साधर्म्यमित्यर्थः ॥ सर्वत्रैकालिकसंबंधेनातिव्याप्तिवारणाय समवाय
नेति । साधर्म्यकथनेनैव वैधर्म्यमपि ज्ञापयितुमाह ॥ यदुक्तमिति । यत्तु गुणवत्वादिकं यस्य द्रव्यस्य साधर्म्यमुक्तं तत्तद्गुणवत्वं तदितरस्य गुणादेः वैधर्म्यं विरुद्धो धर्मः इत्य
मन्यथापि बोध्यं द्रव्यत्वज्ञेयत्वादिकं विहाय बोध्यं तेषां केवलान्वयित्वात् ॥२९॥ तत्र क्षित्यादीनां नवानां गुणवत्वमुक्तं न तावता कस्य कति गुणास्तत्राह ॥ वायुर्नवेति ।
३०॥ केवलेदृशाकांक्षायामाह ॥ स्पर्शादयोऽष्टाविति ॥ स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानि वेगश्च इत्यादि सुगमं ॥३१॥ श्रीरामजयति ॥८१॥

केते इत्याकांक्षायामाहुः स्पर्शादयोऽष्टाविति। स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानि एवमग्रेऽपि सुगमं ॥३१॥३२॥३३॥ बुद्ध्यादिषट्कं बुद्धिसु
खदुःखेच्छाद्वेषप्रयत्नाः ॥ संख्यादिपंचकं संख्यापरिमाणपृथक्त्वसंयोगविभागाः ॥ भावना स्मृतिहेतुर्भावनाख्यसंस्कारः आत्मनः जीवस्य ते च संख्यादयः
पंच खे आकाशे ॥३३॥३४॥ मानसे मनसि ॥३५॥ तत्र शास्त्रस्य त्रेधा प्रवृत्तिः उद्देशो लक्षणं परीक्षा चेति। न्यायभाष्यकारस्वरसात् सर्वाणि द्रव्यं गुणादि या
दि उद्देशेन नाममात्रेण वस्तुसंकीर्तनरूप उद्देशः कृतः। न्यूनाधिकसंख्याव्यवच्छेदफलको विभागश्च कृतः। क्षितिजलतेजःप्रभृतीनां परस्परविरुद्धजातीयानामनु
गमार्थं समानजातीयत्वसंपादकं साधारणं लक्षणं च द्रव्यत्वं गुणयोगित्वसद्भिन्नोक्तं। अपुनाविशिष्यासाधारणस्वरूपतरस्यान्येदान्द्विविधरस आरणधर्मरूपं
लक्षणं प्रत्येकं दर्शयिष्यन् तत्रादौ द्रव्येषु प्रथमोद्दिष्टायाः पृथिव्या आह तत्र क्षितिरिति। तत्र तेषु नवसु मध्ये क्षितिः पृथिवी गंधहेतुः गंधसमवायिकारणं हे
तुत्वेकोक्तेः पृथ्वीत्व तऽ त्वं समवायिकारणमिति। तत्र गंधवती पृथ्वी इति विहाय हेतुरिति पठनं गंधसमवायिकारणतावच्छेदकत्वेन पृथिवीत्वजातिसिद्धये गंधवत्त्वे तथा च १

॥ स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः ॥ स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥३१॥ स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकं ॥ रूपं रसस्तथा स्नेहो
॥ वारिण्येते चतुर्दश ॥३२॥ स्नेहहीना गंधयुताः क्षितावेते चतुर्दश ॥ बुद्ध्यादिषट्कं संख्यादिपंचकं भावना तथा ॥ ३३ ॥ धर्माधर्मौ गुणा एते आत्मनः
॥ स्युश्चतुर्दश ॥ संख्यादिपंचकं कालदिशोः शब्दश्च ते च खे ॥३४॥ संख्यादयः पंच बुद्धिरिच्छा यत्नोऽपि चेश्वरे ॥ परापरत्वे संख्याद्याः पंच वेगश्च मानसे ॥
॥३५॥ तत्र क्षितिर्गंधहेतुर्नानारूपवती मता ॥ षड्विधस्तु रसस्तत्र गंधस्तु द्विविधो मतः ॥ ३६ ॥ ॥ ॥ ॥ ॥ श्रीरामो जयति ॥ ॥ राम

वी १ गंधसमवायिकारणतावच्छेदकतया सिद्धं पृथिवीत्वं च पृथिव्या लक्षणमिति भावः। लक्षणे तावदव्याप्तिरतिव्याप्तिरसंभवश्चेति त्रयो दोषा निराक्रियन्ते ल
क्ष्यैकदेशावृत्तित्वमव्याप्तिः यथा गोः कपिलत्वं अलक्ष्यवृत्तित्वमतिव्याप्तिः यथा गोः शृंगित्वं लक्ष्यमात्रावृत्तित्वमसंभवः यथा गोः एकशफवत्त्वं एतद्दूष
णत्रयरहितो धर्मो लक्षणं स एवासाधारणधर्म उच्यते लक्ष्यतावच्छेदकव्याप्यत्वे सति लक्ष्यतावच्छेदकव्यापकत्वमसाधारणत्वं यथा प्रकृत एव यत्र पृथिवी
त्वमिति। अत्र पृथिवीत्वं सम्यक् लक्षणं [redacted] त्वात् गंधवत्त्वं तत्र स्थ आगंतुकत्वात् अव्याप्तिर्यहार अत एव लक्षणप्रयोजनं। नन्वत्र
२ र सुरभ्यसुरभिकपालारब्धे घटे परस्परविरोधेन गंधानुत्पत्तेरव्याप्तिः। न च तत्र गंधप्रतीतिनिर्वाहाय चित्रगंधोऽभ्युपेयत इति वाच्यं। तत्रावयवगंधेनैव
गंधप्रतीतिनिर्वाहे चित्रगंधे प्रमाणाभावादिति चेन्न गंधसमवायिकारणवृत्तिद्रव्यविभाजक जातिमत्त्वस्य तदर्थत्वात्। नानारूपेति शुक्लनीलपीतरक्तहरित

३ मे २

त॰ नन्व पृथिव्यां स्वर्णे नास्येव किं तैलसरोसाभाव

कपिलच्चित्रत्रैसात्तम्पृथिव्य रूपवतीत्यर्थः। शुक्लनीलादिपरूपवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वमिति यावत्। अतो न केवलजलादावव्याप्तिः। तादृशजातेः पृथि
वीत्वस्य सत्त्वात्। षड्विधस्त्विति। मधुराम्लकटुकषायतिक्तलवणभेदेन [illegible] प्रकार इत्यर्थः। षड्विधरसमधुरादिनैकरसवद्वृत्तिद्रव्यविभाजकोपा
धिमत्त्वं तेन पत्रे केवलरसासत्त्वेऽपि नाव्याप्तिः। तादृशजातेः पृथिवीत्वस्य सत्त्वात्। द्विधा स्थितेति। सौरभासौरभभेदेन द्विप्रकार इत्यर्थः॥ ३६॥
स्पर्श इति। तस्याः पृथिव्याः अनुष्णाशीतपाकजः। अनुष्णोऽनुष्णाशीतोऽशीतः अनुष्णाशीतः स चासौ पाकजश्च अनुष्णाशीतपाकजः स्पर्श इत्य
र्थः। अत्र चाथार्वशरीरे परमाणौ चाव्याप्तिवारणाय पाकज इति। स्पर्शान्तु पाकजस्पर्शमात्रं तत्र शरीरं शास्त्रस्य स्वरूपकथनमात्रं न च पदार्थत्वेऽव्याप्तिः। तत्र पाकज
स्पर्शाभावादिति वाच्यं पाकजस्पर्शवद्वृत्तिद्रव्यविभाजकोपाधिमत्त्वस्य विवक्षितत्वात्। [illegible] द्विधा नित्याऽनित्या चेति। नित्यानित्यत्वभेदेन द्विप्रकारेत्यर्थः।
तत्र का नित्या तत्राह। नित्या स्यादिति। अणुलक्षणा परमाणुस्वरूपा च सा पृथ्व्यादिकार्यानुमेया नित्या उत्पत्तिविनाशरहिता मूलकारणत्वादिति
भावः॥ ३७॥ तदन्या परमाण्वभिन्ना कार्यरूपा घटादिका अनित्या उत्पत्तिविनाशवती कुतस्तत्राह। सा चेति। चो हेतौ यतः सा कार्यरूपा अवयवयो

॥ स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः॥ नित्याऽनित्या च सा द्वेधा नित्या स्यादणुलक्षणा॥ ३७॥ अनित्या तु तदन्या स्यात्सैवावयवयोगिनी॥
॥ सा च त्रिधा भवेद्देह इंद्रियं विषयस्तथा॥ ३८॥ योनिजादिर्भवेद्देह इंद्रियं घ्राणलक्षणं॥ विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः॥ ३९॥ श्रीराम॥ ७॥

गिनी अवयवसमवेता तथा च सावयवत्वात्॥ अनित्या विनाशिनी चेत्यर्थः। कार्यरूपां विभजते। सा च त्रिधेति। च पुनः सा अवयवस्वरूपा देहेंद्रियविषयभेदात् त्रि
प्रकारेत्यर्थः। तत्र देहः आत्मनो भोगायतनं शरीरं। यदवच्छिन्नात्मनि सुखदुःखान्यतरसाक्षात्कारात्मको भोगो जायते तद्भोगायतनं। इंद्रियं शरीरसंयुक्तं
ज्ञानकरणमतींद्रियं त्विति मुनिभिः लक्षणलक्षितं। विषयो विविच्यते तिरस्कृतीन्द्रिया घ्राणकर्णत्वादिद्वारेति व्युत्पत्त्या। स एको देहेंद्रियभिन्नो भोग्य भा
जो घटादिमान् लोकशास्त्रादिप्रसिद्धः॥ ३८॥ तत्र देहमुदाहरति। योनिजादिरिति। योनितो जातं योनिजं आदिर्यस्य योनिजमयोनिजं चेत्यर्थः। तत्रापि
योनिजं जरायुजं अंडजं चेति भेदेन द्विविधं। जरायुजं मनुष्यादीनां। अंडजं सर्पादीनां। अयोनिजं स्वेदजोद्भिदादिकं। स्वेदजाः कृमिदंशाद्याः। उद्भिज्जास्तरु
गुल्माद्याः। नारकिणां शरीरमयोनिजं। एतेषां पार्थिवत्वं तु गंधवत्त्वादेव ध्येयम्। तथा च गंधवत्स्वशरीरं पार्थिवशरीरं बोध्यम्॥ इंद्रियमाह। इंद्रियमिति।

७१२.

३६ २४

जलं निरूपयति वर्णः शुक्ल इति। शुक्ल एवेत्यर्थः। अभास्वर इति शेषः। नन्वेतले केवलशुक्लरूपं पृथिव्यामपि व्याप्तमिति चेत्, न शुक्लरूपेण न रसः समानाधिकरणम् अभास्वररूपवद्
त्ति द्रव्यविभाजकोपाधिमत्त्वस्य शुक्लाभास्वरत्वनियतजातिमत्त्वं मधुरेतररससमानाधिकरणं तद्दर्शयति मधुरशीतलाविति हरीतक्यामलक्यादिमध्ये ननु रसं पृथि-
व्यां जले माधुर्यस्योपलम्भाज्जले मधुरं रसवत्त्वं तथा स्पर्शस्य शीतलस्य रसस्योपलम्भाच्छीतस्पर्शवत्त्वं वाच्यं लक्षणमित्यर्थः। तत्र मधुररसवत्त्वं निष्कृष्य पृथिव्या
मतिव्याप्तिवारणाय मधुरेतररससमानाधिकरणसमानाधिकरणद्रव्यत्वापरजातिमत्त्वे तात्पर्यं शीतस्पर्शवत्त्वं चाप्यस्योत्पन्नविनष्टे जलेऽव्याप्तिवारणाय
य शीतस्पर्शसमानाधिकरणद्रव्यत्वापरजातिमत्त्वे तात्पर्यं शीतं शिलातलमित्यादौ जलस्पर्शस्यैव तत्रोपलम्भ इति न तत्रातिव्याप्तिः। केचित्तु जले शुक्लेतररूपस्य
मधुरेतररसस्योपलम्भस्पर्शस्य चोपलम्भस्तु पार्थिवतौपाधिकद्रव्योपाधिकः। जलादेर्धारणाकर्षणहेतुसंयोगात्मकसंग्रहस्य दर्शनात् कठिनेऽपि तादृशि दुग्धे
मधुरेतररसस्योप स्पर्शस्य चोपलम्भस्तु पार्थिवतौपाधिकद्रव्योपाधिकः। जलादेर्धारणाकर्षणहेतुसंयोगात्मकसंग्रहस्य दर्शनात्। कठिनेऽपि तादृशि दुग्धे
तैः काञ्चनादिषु अग्नेर्भूमादिषु च दृश्यते स्यात् दर्शनाच्च जलगुण एव स्नेहस्तत्र गृह्यते॥ स्नेह इति। तत्र जले अव्याप्तिपूर्वं व्याप्तिवारणाय स्नेहसमा-
नाधिकरणद्रव्यत्वापरजातिमत्त्वे तात्पर्यं॥ घृतादेस्तु संयुक्तसमवायेन जले न तादेव तेन न तत्र जातिव्याप्तिः। द्रवत्वं सांसिद्धिकं द्रवत्वत्वेनाव्यासापारणाधि-

॥ वर्णः शुक्लो रसस्पर्शौ जले मधुरशीतलौ। स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतं॥३९॥ नित्यतादि प्रथमवत् किंतु देहमयोनिजं। इंद्रियं रसनं
सिंधुर्हिमादिर्विषयो मतः॥४०॥४०॥

त्याह॥ द्रवत्वमिति। सांसिद्धिकं सहजमित्यर्थः पृथिव्यादाविवाग्निसंयोगनिरपेक्षमिति यावत्। भागवज्जातिघटितमिदमपि बोध्यं तैलादौ तु परिदृश्यमानं सांसिद्धिकं द्रव-
त्वं न तदन्तर्गतजलस्यैवेत्यर्थः॥ ननु तर्हि तैलसन्निपाते कथं दहनशक्तिर्दृश्यते इति चेत्, स्नेहप्रकर्षादिति बोध्यं॥४०॥ नित्यतादीति प्रथमवदिति पृथिवीवदित्यर्थः नित्या
च अनित्या च सा च द्विविधा देहेन्द्रियविषयभेदेन त्रिधा एवं जलमपि नित्यमनित्यं च अनित्यमपि त्रिविधं देहेन्द्रियविषयभेदेन त्रिविधमित्यर्थः। तत्र पृथि-
वीतो यो विशेषस्तमाह। अयोनिजमिति। अयोनिजमेवेत्यर्थः। वरुणलोके प्रसिद्धमिति भावः। इन्द्रियमाह। इन्द्रियं रसनमिति रसग्राहकं जली-
यमिति शेषः। रसग्राहकमिन्द्रियं जलीयमिन्द्रियमिति यावत्। तस्य जलीयत्वं तु रूपादिषु मध्ये रसस्यैवाभिव्यञ्जकत्वादवध्येयम्। विषयमाह॥ सिंधुहिमादिरिति सि-
न्धुः हिमकरकादिर्यस्य सरित्तडागः समुद्रहिमादिर्विमानदेहेन्द्रियभिन्नो जलीयविषय इति भावः॥ अत्र सर्वत्र जलत्वं जातिसिद्धिस्तु स्नेहशीतस्पर्शादिसमवा-

१.

४

तेजो निरूपयति। स्पर्श इति। अत्राप्युष्णत्वं निरुक्तं(?) व्याप्तिवारणाय एव स्पर्शसमानाधिकरणद्रव्यत्वापरजातिमत्त्वं तात्पर्यं। उष्णो जलमिति शीते स्नेहः संबंधानुवि
धायित्वान्न तथा नित्यानित्यः शुक्लं भास्वरं परप्रकाशकं। शुक्लेपदस्य स्वरूपकीर्तनत्वाद् भास्वररूपवत्त्वं प्रागभावाजातिघटितं लक्षणं बोध्यम्। वैश्वानरादौ शुक्लस्यासत्त्वेपि
पार्थिवेऽलाभिभवादनुपलम्भः। नैमित्तिकं द्रवत्वमपि लक्षणमित्याह। नैमित्तिकेति। घृतादौ व्याप्तिवारणाय घृतादि पृथिव्यामतिव्याप्तिवारणाय पृथिव्यवृत्तिनैमि
त्तिकद्रवत्ववद्वृत्तिद्रव्यत्वापरजातिमत्त्वे तात्पर्यं पूर्ववत्। जलवत्। तथाहि जलवत्तेजोऽपि द्विविधं नित्यमनित्यं च परमाणुस्वरूपं नित्यं तदन्यदनित्यं सावयवं तत् त्रिविधं
२ शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजमेव सूर्यलोके प्रसिद्धं ॥४२॥ अत्र यो विशेषस्तमाह। इन्द्रियमिति। नयनं हि पश्यति रूपादिकमनेनेति नयनं वह्निरिति सुत्य
स्य चक्षुः पदार्थाभेदं तैजसमिति शेषः रूपग्राहकमिन्द्रियं तैजसमिन्द्रियमिति यावत्। तस्य तैजसत्वं तु प्रमाणं स्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपाभिव्यञ्जकत्वा
दीपवत्। विषयं दर्शयति वह्निः सुवर्णादिरिति। वह्निः सुवर्णादिर्यस्य सः अग्निसुवर्णरजततामरिपुञ्जादयः स्यादिः रूपादिमानदेहेन्द्रियभिन्नस्तेजसवि
षय इति भावः। तथाच विषयात्मकं तेजोऽपि चतुर्विधं भौमं आकरजं दिव्यं औदर्यं चेति। तत्र भौमं इन्धनादिजन्यदहनप्रदीपादिकं आकरजं सुवर्णादिकं दिव्यं

-

स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरं। नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ॥४२॥
इन्द्रियं नयनं वह्निः स्वर्णादिर्विषयो मतः। अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ॥४३॥

विद्युदादि सूर्यविद्युदादि औदर्यं उदरे अन्नं भुक्तान्नपचनहेतु जाठरपदप्रसिद्धं तेजः। ननु सुवर्णस्य कठिनस्पर्शवत्त्वात् पीतरूपवत्त्वात् गुरुत्ववत्त्वाच्च पार्थिवत्वमेव
युक्तं न तैजसत्वं भास्वररूपाभावात् उष्णस्पर्शाभावाच्चेति चेत्। अत्र वदंति। पृथिवीद्रवस्यासंतानलसंयोगेनोच्छेदस्य दर्शनात्। अत्यन्तद्रवत्वस्य च स्वाभाविकत्वात्। ता
दृशसंयोगेनापि सुवर्णे द्रवत्वस्यानाशाद्स्वाभाविकत्वात् द्रवत्वस्य पृथिवीत्वे जन्यद्रवत्वमेव सिद्धं तदाश्रयस्य तैजसत्वमेवेति॥ तेजस्त्वजातिसिद्धिस्तु तत्र सर्व
ज्ञो पणस्पर्शादिसमवायिकारणतावच्छेदकतया बोध्या जिज्ञासितं प्राग्वदेव दिशा ज्ञेयम्॥ वायुं निरूपयति। अपाकज इति। पाकाजन्य इत्यर्थः पाकजः न पाकजोऽपा
ग कजः पृथिव्यामिव विजातीयतेजःसंयोगलक्षणेन पाकेन वायोः स्पर्शपरावृत्त्यदर्शनादपाकजत्वं स्पर्शो विशेषितः इति भावः॥ अनुष्णाशीतेत्यंशस्तु प्रागेव व्याख्या
तः। तथाचापाकजोऽनुष्णाशीतस्पर्शवत्त्वं लक्षणं पृथिवीतेजोजलेषु अतिव्याप्तिवारणाय स्पर्शविशेषणानीति भावः॥४३॥ ५॥ ॥५॥ श्रीरामो जयति॥ ५॥ राम

तिर्यग्गमनवानिति एष इति शेषः स्वरूपकथनमात्रमिदं न तु लक्षणं अव्यावर्तकत्वात् रहितमिंद्रियजन्यप्रत्यक्षसमावेरूपस्य कारणत्वात् वायोरूपाभावात्प्रत्यक्षत्वं नास्ती
त्वचेति अतोऽनुमानमेव प्रमाणमित्यभिप्रेत्याह ज्ञेयः स्पर्शादिलिंगक इति स्पर्शश्चादिर्यस्य शब्दस्य कंपस्य धृतेश्च सः स्पर्शादिर्लिंगं अनुमापकं यस्य स तादृशः स्पर्शः शीतो-
ष्णस्पर्शादिषु लक्षणमन्यादृशः सांनिध्ये विजातीयोपलभ्यमानैरिति स्पर्शः देहं विहाय वा विना आश्रयमानैः कीचकादिषु शब्दैः हस्तादिव्यापारं विना आश्रयमानैः तृणादिकंपनैः
अस्य दातादिप्रयत्नं विना गगने तृणानां विहंगमप्रभृतीनां धृतिर्भिन्नाश्रयानुमीयत इति यावत् अनुमानं च तादृशः स्पर्शः क्वचिदाश्रितः स्पर्शत्वात् संमतवत् तादृशः शब्दः स्प-
र्शवद्द्रव्यहेतुकः शब्दत्वात् संमतवत् तादृशः कंपः स्पर्शवद्द्रव्यहेतुकः कंपनत्वात् संमतवत् तादृशी धृतिः स्पर्शवद्द्रव्यजन्या धृतित्वात् संमतवत् इत्यादि प्रत्येतव्याः प्रा वायुसि-
स द्धिः। पूर्ववदिति तेजोवद्वायुर्द्विविधो नित्योऽनित्यश्च नित्यः परमाणुरूपः अनित्यस्तदन्यः सोपि त्रिविधः शरीरेंद्रियविषयभेदात् शरीरमयोनिजमेव वायुलो-
के प्रसिद्धं तत्रयोर्विशेषं समाह देहव्यापीति देहं व्याप्य स्थितं त्वगिंद्रियं त्वचि सर्वत्र स्पर्शग्रहणं वर्तमानत्वात् रूपाद्यभिव्यंजकं वायवीयमिति शेषः स्पर्शग्राहक-
मिंद्रियं वायवीयेंद्रियमिति यावत् तस्य वायवीयत्वं तु रूपादिषु मध्ये स्पर्शस्यैव ग्राहकत्वाद्बोध्यं ॥४४॥ विषयं दर्शयति प्राणादिरिति प्राणः आदिर्यस्य अपानस्य समा-
नस्योदानस्य व्यानस्य तेषां प्रश्च सः महावायुर्यंतः स्पर्शादिमान् देहेंद्रियभिन्नो वायवीयविषय इत्यर्थः प्राणस्यैवाध्यात्मिकतया भोगप्रधानत्वान्मध्यमतो निर्देशः ॥

तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिंगकः ॥ पूर्ववन्नित्यताद्युक्तो देहव्यापित्वगिंद्रियं ॥४४॥ प्राणादिस्तु महावायुपर्यंतो विषयो मतः ॥४५

सत्वेकोपि स्थानभेदात् प्राणापानादिसंज्ञां लभते। तथाहि हृदि प्राणः गुदेऽपानः समानो नाभिदेशगः उदानः कंठदेशस्थो व्यानः सर्वशरीरग इति। महावायुस्तु स्फुट एवेति सं-
क्षेपः एतेषां सृष्टिसंहारप्रकारस्तु प्रशस्तपादभाष्ये कथितः। तथाहि चतुर्युगसहस्रांते ब्रह्मणो दिनमुच्यते॥ इत्येवं गणनया प्राप्ते सर्वजीवानां सुषुप्तिमोक्षकाले विहा-
कामकर्मधारणाभिर्दुरंतदुर्वारसंसारचक्रे परिभ्रमतां तथा रतेषु कीटानामिवातिखिन्नानां प्राणिनां विश्रामार्थं परमकारुणिकस्य सकलभुवनपतेर्महेश्वरस्य तर
संजिहीर्षा भवति अतस्तदानीमेव प्राणिकर्मणां फलोन्मुखवृत्तं गच्छति ततस्तदानीमेव भगवदिच्छया स्पंदारंभकाः परमाणवः स्पंदमाना भवंति ततस्तेषां परस्परं वि-
भागे सत्यारंभकसंयोगनाशे द्व्यणुकादिद्व्यणुकांतस्य सर्वस्य नाशो भवति ततः प्रविभक्ताः परमाणव एवावतिष्ठंते। धर्माधर्मसंस्कारैर्युक्ताः जीवाश्चतावंतमेव कालं
निरुपाख्या अवतिष्ठंते॥ ततः पुनरस्तमितेषु जीवानां धर्माधर्मादिभोगार्थं महेश्वरस्य सिसृक्षा भवति ततः प्राणिकर्माणि फलोन्मुखानि भवंति ततो भगवदिच्छ- ति
या प्राणिकर्मभिश्च परमाणवः स्पंदमाना भवंति ततः परमाणूनां परस्परसंयोगे द्वाभ्यां परमाणुभ्यां द्व्यणुकं त्रिभिर्द्व्यणुकैस्त्र्यणुकं त्रिभिस्त्र्यणुकै-
श्चतुरणुकमिति क्रमेण महान् वायुः समुत्पद्यते। ततस्तस्मिन्नेव वाप्येभ्यः परमाणुभ्यस्तेनैव क्रमेण महान् सलिलनिधिरुत्पद्यते ततस्तैजसपार्थिवेभ्यः परमाणुभ्यः

द्रव्यत्वेन आकाशस्य पूर्वमभावात्

स्तोने व कर्मेण महापृथिवी समुत्पद्यते ॥ ततस्तस्मिन्नेव चोदृष्टे तैजसेभ्यो ऽणुभ्यस्तेनैव क्रमेण महानुत्तेजोराशिः समुत्पद्यते र वंसमुत्पन्नेषु महाभूतेषु चतुर्मुखमहेश्वरसन्निधानात्तेजसेभ्यो ऽ
णुभ्यः पार्थिवाणुसहितेभ्यो महदण्डमुत्पद्यते । तस्मिंश्च चतुर्वदनं ब्रह्माणं सर्वभुवनसहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते स च महेश्वरः ॥ स च महेश्वरेण नियुक्तो ऽतिशयितज्ञानवैराग्यैश्वर्यसंपन्नः सर्वेषा
ं प्राणिनां कर्मविपाकं विदित्वा कर्मानुरूपज्ञानभोगायुषः सुतान् प्रजापतीन् मानसान् मनुदेवर्षिपितृगणान् मुखबाहूरुपादेभ्यश्चतुरो वर्णानन्यानि चोच्चावचानि भूतानि सृष्ट्वाशयानुरूपैर्धर्मज्ञा
नवैराग्यैश्वर्यैः संयोजयतीति । ततः प्राणिनः स्वस्वकर्मभिर्नियोजयन् संयोगविभागकर्मफलभाजो भवन्तीति संक्षेपः ॥ ४४ ॥ आकाशं निरूपयति । आकाशस्येति । आकाशशब्दव्युत्पत्त्या प्राप्तः शब्दस्तज्जातिमत
न्वैशेषिकः ॥ स्वाश्रयीभूतविशेषगुणत्वर्थः ॥ शब्दस्याकाशत्वेन प्रसिद्धमाकाशलिङ्गत्वमभिप्रेत्य आत्मकालादिविभुसंभवात् शब्दस्य आकाशस्य लक्षणमिति भावः । स्यादेतत् शब्दजनकतावच्छेदकं तत्र विशि
ष्टे तं शब्दत्वमेवेति चेन्न । नैकार्यस्य कार्यात्पूर्वमभावात् । कार्योत्पादकत्वव्यञ्जकमनेन प्रसिद्धेः । तद्दृष्टान्तेन तावच्छेदकावली स्वेन कार्योत्पादकत्वात् । यद्वा आकाशस्य व्यापकत्वेन सर्वदेशशब्दस्या
विर्भावमानत्वात् कारणतावच्छेदकावृत्तित्वे सत्येवं स्वकार्योत्पादकत्वं व्यञ्जयितुं प्रमाणं वक्तुं शक्यमिति विस्तरः ॥ नित्यत्वेन निरवयवत्वेन च तत्र शरीरविषयेन्द्रियभावादिन्द्रियमाह ॥ इन्द्रिय
मिति । श्रोत्रं कर्णविवरसंयुक्तं नभः ॥ ननु गगनस्यैकत्वेन श्रोत्रं तु पुरुषभेदेन भिन्नं कथमाकाशं स्यात्तत्राह ॥ एकः सन्नपीति । स्वरूपतो ऽत्र विभाजकोपाधिमत्त्वादिति यौगिकं भेदं रहितोपि उपा
धितः ॥ कर्णशष्कुल्यवच्छिन्नोपाधितः श्रोत्रं भवतीत्यर्थः ॥ यद्यपि शब्दगुणेन तु मितं स्याकाशोलाघवादेकोनित्यश्च तथापि कर्णशष्कुलीभेदभेदात्तत्तत्पुरुषभेदेन भिन्नं भवतीति भावः ॥

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥ इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः ॥ ४५ ॥
जन्यानां जनकः कालो जगतामाश्रयो मतः ॥ परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ॥ ४६ ॥

कार्य ५

१ नित्यकालसिद्धेः अत्रेश्वर एवाकाशोस्तु शब्दलक्षणमिति निरुक्ताकाशेनेति जीवादिभिन्नाश्रितिलिङ्गकाभावेनातिसिद्धस्यात्र विस्तरः ॥ ४५ ॥ कालं निरूपयति । जन्यानामिति । जन्यानां उत्पत्तिमतां घटादी
नां जनकः निमित्तकारणं कुतो ऽवधारितमिति चेत् युगपज्ज्ञानं स्थिरं ज्ञानः सिद्धो जातः दृष्टाः इदानीं जातो ऽयं ततो ऽत्र ज्ञानद्वयादिभ्यो नयपद्यशस्यकेतु ऽते पुष्पफलादीनां
वासंतिकहेमंतिकसंशयादिवलाच्छेत्यवहि । निसाजामपि कालसंबंधित्वाविशेषे ऽनियमश्चैव तादृशप्रत्ययस्य कालाधीनोत्पत्तिमत्त्वेन्नेव यन्तत्व स्यावश्याभ्युपेयत्वात् इत्थं च
कालसिद्धिरपीति भावः । जगदाश्रयत्वप्रतीतिरपि कालमानमित्यमिप्रेत्याह ॥ जगतामिति । सर्वेषां नित्यानित्यपदार्थानां आश्रयः कालिकसंबंधेनाधिकरणं इदानीमिद
मित्यादिप्रतीतेरित्यर्थः सूर्यपरिस्पन्दादेरेवाश्रयत्वप्रतीतिविषयत्वेतिभेदे नयुक्तं सूर्यपरिस्पन्दघटयोः साक्षादसंबद्धत्वात् कालस्य संबंधघटकत्वेन कालस्यैव घटा
दाश्रयत्वौपाद्यादितिदिक् ॥ लक्षणमाह । परापरत्वेति । परस्यापरस्य परत्वापरत्वेतिकर्मधारयः परापरत्वं परत्वमपरत्वं च तद्विषयो हेतुः तद्बुद्धेरसाधारणकारणमित्यर्थः ज्येष्ठकनिष्ठा
दिनिष्ठपरत्वापरत्वज्ञानासाधारणकारणत्वं कालस्य लक्षणमित्यर्थः ॥ कथं कारणत्वमिति चेत् तत्र रूपरसीभूतबहुकालीनत्वाल्पकालीनत्वज्ञानस्य कालमिवं धूमता
दिसवेहि ननु कालस्यैकत्वात् क्षणादिव्यवहारः कथं स्यात्तत्राह ॥ क्षणादिरिति । आदिनालवनिमेषकाष्ठाकलामुहूर्तादिपरिग्रहः उपाधितः स्यात् ते स्वस्वप्रतियोग्य
नायोरसामर्थ्यत्वस्यैकोपाधितः क्षणः प्रतिक्षणं कस्यचित् उत्पत्तेः कस्यचिद्विनाशादितद्बोध्यं क्षणादयस्थले नवपदमेतावतीति संक्षेपः ॥ नादेशाकालो पाधिकः कालो

दिशं निरूपयति ॥ दूरान्तिकेति । इदं दूरं इदं अन्तिकं समीपमिति । धीर्यतः सा असाधारणं कारणमित्यर्थः ॥ आदिना प्राची प्रतीची इत्यादिपरिग्रहः ॥ दूरत्वं चात्र दैशिकं परत्वं अन्तिकत्वं दैशिकापरत्वं । तथा च दिक्कृतपरत्वापरत्वासाधारणकारणं दिगेव एकत्वमिति भावः । कथं कारणत्वमिति चेत् तत्कारणीभूतदूरतरदेशवृत्तित्वसमीपतरदेशवृत्तित्वज्ञानस्य दिगिति । तच्च परत्वादिप्रत्यक्षे हि । सा च लाघवादेका नित्या चेत्याह ॥ एका नित्येति । एकत्वं च तत्र द्रव्यविभाजकोपाधिमत्त्वे सति योगिकभेदरहिता ॥ नित्या अनाद्यनन्ता ॥ ननु दिश एकत्वे प्राचीप्रतीच्यादिभिन्नव्यवहारः कथं तत्राह । उपाधिभेदादिति । उपाधिश्चोदयाचलादिसान्निध्यादिस्तथा च तदपेक्षया उदयाचलसंनिहिता तत्र प्राची (प्रतीच्यादि ...) अस्ताचलसंनिहिता प्रतीची तत्प्राभिमुखपुरुषवामभागावच्छिन्ना दिगुदीची एतादृशपुरुषदक्षिणभागावच्छिन्ना दिग् दक्षिणेत्यादिकं स्वयमूह्यं । न च आकाशस्य परमेश्वरस्य एव वा दिगादिव्यवहारजनकता स्विति तेन विनिगमकाभावेनातिरिक्तदिशोऽसंगो ... कालादिष्वयं विस्तरः ॥ ४७ ॥ आत्मानं निरूपयति । आत्मेति । आत्मा अन्यत्र ज्ञानादिसमवायिकारणता वच्छेदकात्म

॥ दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक् ॥ ४७ ॥ आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकं ॥

॥ शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ॥ ४८ ॥ तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ॥

पदप्रवृत्तिनिमित्तात्मत्वजातिमान् स आत्मा अधिकरणं इन्द्रियाद्यधिष्ठाता इन्द्रियादिप्रेरक इत्यर्थः । तत्र मानमाह । करणं हीति । हि यस्मात् करणं क्रियायाः व्यापारवदसाधारणं कारणं सकर्तृकं कर्तृप्रेर्यं । तथा च श्रोत्रादीनि करणानि कर्तृप्रेर्याणि करणत्वात् वास्यादिवदित्यनुमानमेतत्र निष्प्रमाणं लब्धं श्रोत्रादीनि त्वचसक्षास्पविषयसाक्षात्कारजनकत्वेनानुमीयन्त इति न पक्षासिद्धिरिति संक्षेपः ॥ ननु कर्तृत्वे ज्ञानचिकीर्षाकृतिमत्त्वं तच्च शरीरादिनिष्ठमेवास्तु गौरोऽहं जानामि करोमीत्यादिप्रतीत्या गौरत्वसमानाधिकरणत्वादीनां सामानाधिकरण्यग्रहादिति चार्वाकाशङ्कामपाकरोति । शरीरस्येति । शरीरस्य शरीर्यत इति विग्रहे शरीरे देहस्य न चैतन्यं न ज्ञानादिकं घटादिवद्रूपादिमत्त्वादिना अवच्छेदे इति भावः । कुत इत्यत्र हेतुमाह । मृतेषु चेति । शवावस्थायां ज्ञानस्यासंगत । तथा च शवावस्थायां व्यभिचारित्वात् ज्ञानादिकं न देहगुण इति भावः ॥ ४८ ॥ ननु चिकीर्षाचलनादि क्रियाकरणानां कुठारादीनां ज्ञानवत्त्वबाधे पि ज्ञानकरणानामिन्द्रियाणां ज्ञानवत्त्वमस्तु करणत्वेन ज्ञानाश्रयत्वमात्रकल्पने लाघवादित्यत्राह ॥ तथात्वं चेति । तथात्वं ज्ञानवत्त्वं इन्द्रियाणां ज्ञानकरणानां चक्षुरादीनां ज्ञान देहसीदेत्यपि कार्यार्थं अन्यत्र चेत् हि इन्द्रियाणां उपघाते नाशे सति कथं स्मृतिः न कथमपि न भवेदित्यर्थः ॥ स्मृतिस्तावदनुभवका

मास्तु बाह्येन्द्रियाणामात्मत्वं मनस्तु स्यात् । नियतत्वेन तद्दोषनिवृत्त्या तत्संकल्पयामीत्यादिप्रतीतेश्चेत्यत आह । मनोऽपि न तथेति । मनसः सुखाद्युपलब्धिकरणत्वं न
तथा न चेतनं करणत्वेन स्वचेतनत्वासंभवादिति भावः । तत्र युक्त्यन्तरमाह । ज्ञानाद्यनध्यक्षमिति । आत्मसंयोगापादनाय ज्ञानमात्रे करणत्वे नापरस्य त्वे [illegible]
मनसोऽणुत्वसिद्धान्तमानादेवाणोर्यदि कर्तृत्वे लाघवादिति तत्कार्ये कर्तृत्वं तदा तत्समवेतज्ञानादेरनध्यक्षपरमाणुगुणानामिवाध्यक्षं स्यात् । गुण
लौकिकप्रत्यक्षसमानाधिकरणत्वे न हेतोर्महत्त्वस्य तत्राभावात् ॥४९॥ मास्तु मनस आत्मत्वं प्राणस्यैव तु स्याद्देहस्य सा मि जीवनस्य सुषुप्तिगोचरत्वेपि
पासितत्वयोग्दिश्यतीतेः करणोपरमेपि सुषुप्त्यादौ जीवनहेतुत्वाच्च तत्कालमुपलम्भोपीति । प्राण आत्मा न भवतीति स्वसत्तायां चेतनत्वव्यभिचारदिशयति
सुषुप्तौ चेतन्याभावं प्राणस्य सावयति । चेतयेति । तस्य प्राणस्य चैतन्ये चेतनत्वं गीकृते तत्र सुषुप्तौ करणोपरमावस्थायामप्युपलब्धिः स्वपुष्प्यं स्यात् । जीवनादि
व्यापारोऽलीकः स्यात् । विश्रामावस्थारूपायां तस्यां चेतनयोपरमे व्यापारासम्भवात् । चेतनस्य तस्य व्यापारे तु सुषुप्तत्वव्याघातप्रसंगात् ।
करणस्वामिनि चेतने न चेतनं तस्मिन् स्वव्यापारे नरायत्ते व्यापारारम्भः करणानामुपरमायोगात् । न हि संभवा [illegible] समनो घटके सम्भि कावा

॥ मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् ॥४९॥ प्राणोऽप्यात्मा न नरतिज्ञानाभावात् सुषुप्तिषु । चैतन्ये तस्य तत्रैव स्वपुष्प्यं व्याप्तेर्भवेत् ॥५०॥
धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥

प्रविरामो दृश्यते तस्मान्न प्राणश्चेतनो न वा करणाधिपतिश्चेतद्विरामे देहेन्द्रियादिसर्वेषां विरामात् प्राणस्य तु न विरामो जीवनादृष्टेन प्रतिबन्धात् ।
तस्मात्सिद्धं देहेन्द्रियमनःप्राणेभ्यो भिन्न आत्मेति ॥५०॥ धर्माधर्माश्रयत्वादपि सतादृश इत्यभिप्रेत्याह । धर्माधर्मेति । ॥ आत्मेत्यनुषज्यते । ध
र्माधर्मयोः पुण्यपापयोः समवायेनाधिकरणमात्मेत्यर्थः । देहेन्द्रियादीनां न तदाश्रयत्वे तु देहान्तरकृतकर्मणां देहान्तरे भोगो न
स्यात् कर्तुर्निर्भोगात् । यद्यपि मनस्तिनाशे दोषो नियत्वात् । तथापि मनसो मूर्तत्वादिहेतुभिरचेतनत्वेन भोक्तृत्वासंभवेनात्मत्वं । तस्मादात्मैव
धर्माधर्माश्रय इति सिद्धं मे । स्वप्रकाशोऽपि न भवति विशेषगुणसंबंधं विनाऽप्यानादिरित्यभिप्रेत्याह । अध्यक्ष इति । ॥ विशेषगुणयोगतः यो
ग्यात्मज्ञानादयो विशेषगुणास्तेषां योगतः संबन्धेन प्रत्यक्षः अहं जानामि इच्छामि करोमि सुखी दुःखी इत्यादिप्रत्यक्षविषय इत्यर्थः । स्वसु
तौ

६ किंत्वत्यवस्थचेतनः करणाधिपतिः ६

[illegible]

धर्माधर्माश्रयत्वस्य चागमप्रमाणत्वग्रहं विनाद्‌ग्रहत्वाद्विशेषानुमानमाह · प्रवृत्तीति ॥ आत्ममात्रस्य स्वस्य पानगोचरचेष्टानुमितप्रवृत्त्यादीनाऽनुमेय इत्यर्थः ॥ आदिनालक्षणप्रयशोकादिपरिग्रहः ॥ तथा हि प्रवृत्त्यादिकं प्रतीष्टसाधनताज्ञानादिकं कारणं तथैवान्वयव्यतिरेकात् · इच्छा चेतऽजन्मनि तथा ननु भूतेषु पूर्वानुभवाधीनस्मृति तएव तत्संभवात् पूर्वपूर्वसिद्धेस्तेस्यानादित्वं मनादिभावस्य तु न नाश इति नित्यत्वे सति ज्ञानवत्त्वो देहेन्द्रियमनोभिन्नत्वेन सिद्धिरित्यर्थः ॥ एवं परदेहादावपि आत्मा परमात्मकोऽनुमेयः चेष्टानुमितप्रवृत्तिमत्त्वादिस्त्वनुमेय इत्यर्थः । तत्र दृष्टांतः रथेत्यस्येति · रथकर्मणा सारथिर्यथानुमीयते तद्वदित्यर्थः ॥ ५१ ॥ अहमिति धीविषयत्वादप्यात्मा देहादिभ्यो भिन्न इत्याह · ॥ अहंकारस्येति · अहंकारोऽहमिति प्रत्ययस्तस्याश्रयो विषय इत्यर्थः ॥ स एवं कुतो विषयस्तत्राह · ॥ मनोमात्रस्येति · मन एवं मनोमात्रं तस्य गोचरो योग्य इत्यर्थः । नहि बहिरिन्द्रियव्यापारमन्तरेणापि मनसो जायमानमानस प्रत्यक्षविषय इति यावत् · शरीरादेर्विषयत्वेऽहं प्रत्ययस्य मानसत्वं न स्यात् किंतु बहिरिन्द्रियादिजन्यत्वमेव शरीरादेर्मानसत्वात् · तस्मात्तत्तो विरि

॥ प्रत्यक्षं तु मेयोऽयं रथगत्येव सारथिः ॥ ५१ ॥ अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः ॥
विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ॥ ५२ ॥

प्रयोगोऽस्त्वनेकमपि ज्ञानं देहादिभिन्नत्वेनात्मनो नाहं गौर इत्याद्याकारं भावना विशेषसहकृतेन मनसैव भवतीमनसैवानुद्रष्टव्यमिति · श्रुतेरिति भावः ॥ महतोमहीयानन्त्याययानाकाशादित्यादिश्रुतेर्नित्यनिरतिशयव्यापकत्वादपि देहादिभ्यो भिन्नमात्मेत्याह · विभुरिति व्यापक इत्यर्थः ॥ अणुत्वे गगनायां निमग्नस्य युगपत्सर्वाङ्गीनशैत्योपलंभोभावप्रसंगात् · मध्यमत्वे चैकस्यात्मनः क्रमेण मशकमतंगजतनुजशीरीरे शासारवयवोपचयापचये प्रसारणश्यवक्तव्यत्वे हानिश्चयत्वप्राप्त्याकृतहानाकृताभ्यागमप्रसंगात् · मध्यमत्वे आकाशवत्सर्वगतश्चनित्य इतिश्रुतेश्च नित्यो विभुरेवात्मानाणुर्नवा मध्यम इति भावः · ननु जीवानांविभुत्वे सर्वदेहसान्निध्याद्भोगसांकर्यप्रसंग इति वाच्यं · तत्तद्गतत्वमनसामनादिस्वस्वामिसंबंधवत्तेनान्यथायाः संभवेन भोगसांकर्याभावादित्यन्यत्र विस्तरः ॥ आत्मनो विशेषगुणानाह · बुद्ध्यादिगुणवानिति · आदिपदाद्दिच्छादिपरिग्रहः ॥ बु

तदेव दर्शयति • अनुभूतिरिति • अनुभवामीति प्रत्ययसिद्धोऽनुभवत्वजातिमाननुभवः। योऽनुभवः प्रमाणहेतुको वा संस्कारमात्रजन्यज्ञानं स्मृतिः तद्भिन्नं ज्ञानमनुभव इत्यर्थः॥
तच्चानुभवं विभजते • अनुभूतिश्चतुर्विधेति • तदेव दर्शयति प्रत्यक्षमित्यादि प्रत्यक्षं साक्षात्करोमीति प्रत्ययवेद्यसाक्षात्कारत्वजातिमान् प्रत्ययः अनुमितिः अनुमिनो
मीत्यनुभवसिद्धानुमितित्वजातिमान् प्रत्ययः उपमितिः उपमिनोमीत्यनुभवसिद्धोपमितित्व जातिमान् प्रत्ययः • शाब्दो जानामीत्यनुभवसिद्ध
शाब्दत्वजातिमान् प्रत्ययः एतेषां भेदाच्चतुःप्रकारेत्यर्थः॥५३॥ तत्र प्रत्यक्षं व्युत्पादयति • इन्द्रियमिति • तत्र तेषु चतुर्विधानुभवेषु मध्ये प्रत्यक्षे कृतिरेतल
फलेन केवलं करणमिन्द्रियं तत् अपितु परमेव रक्ष्यमाणे ष्वपि चेत्यपि इन्द्रियं प्रत्यक्षजनकतावच्छेदकेन्द्रियत्वेनाभेदं डेपपि मनोहीन करणमतीन्द्रिय
चक्षुरादिकरणव्यापारवदसाधारणं कारणं तथा चेन्द्रियजन्यज्ञानत्वमिति प्रत्यक्षलक्षणं प्राप्तं तेन च ज्ञानमात्रस्य मनोरूपेन्द्रियजन्यत्वादनुमित्या
दाविदमतिव्याप्तमिति शङ्कायां विषयतयेन्द्रियजन्यत्वस्य विवक्षितत्वात् • षड्विधं दर्शयति • घ्राणजादीति • घ्राणजं रासनं चाक्षुषं स्पार्शनं श्राव
णं मानसमिति • भेदेन षट्प्रकारमित्यर्थः॥५४॥ तत्र घ्राणजं व्युत्पादयति • घ्राणस्येति • गोचरो ग्राह्यः गंधत्वादिरित्यादिपदात् सौरभत्वादिपरि

॥५३॥ इन्द्रियं करणं तत्र प्रत्यक्षे तु इतीयपि च॥

॥ अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा॥ प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे॥५३॥ तथा रसो रसज्ञायास्तथा शब्दो
॥ घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतं॥५४॥ घ्राणस्य गोचरो गंधो गंधत्वादिरपि स्मृतः॥ तथा रसो रसज्ञायास्तथा शब्दो
॥पि च श्रुतेः॥५५॥ उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वंति पृथक्त्वसंख्ये॥ विभागसंयोगपरापरत्वे स्नेहद्रवत्वे परिमा
णयुक्तम्॥५६॥

ग्रहः तथा रस इति रसत्वजातिसहित इत्यर्थः तथा शब्दोपि चेति शब्दत्वजातिसहित इत्यर्थः • श्रुतेः श्रोत्रेन्द्रियस्य गोचरस्त्वोद्भूतो ग्राह्यः। अनुद्भूतस्याप्रत्यक्षत्वात् •
न चानुद्भूते मानाभावः पृथिवीत्वादिना घ्राणादौ गंधानुमानेन परिशेषात् सिद्धेः॥५५॥ चाक्षुषं व्युत्पादयति • उद्भूतरूपमिति • उद्भूतत्वं न जातिः शुक्लत्वादिना
संकरात् किंतु शुक्लत्वादिव्याप्यानुद्भूतत्वाभाववत्वं उद्भूतत्वमेव तथाविधं नयना स्थितिरित्युक्तेः रहितिर्व्यवस्थितावच्छिन्नेकारणतावच्छेदककोटिप्रविष्ट
तयाऽनुगतोऽद्भूतत्वस्यापेक्षणादिर्व्यवस्थिरस्तु। स्पर्शरूपत्वं चक्षुर्ग्राह्यमित्यर्थः। अत्र योविशेषस्तमाह • द्रव्याणीति • तद्वंति उद्भूतरूपवंति गोचर इत्यनु

दिशि

र

क्रियायाः उत्क्षेपणादिकर्म जातिः द्रव्यत्वरूपत्वादिः योग्यवृत्तिः योग्यव्यक्तिगतेत्यर्थः समवायश्च तादृशः योग्यव्यक्तिवृत्तिः प्रत्यक्ष इत्यर्थः इदं तु न्यायैकमतमाश्रित्य वै
शेषिकनये घटाकाशसंयोगादेरिव समवायस्याप्रत्यक्षत्वादिति संक्षेपः॥ नन्वेवमंधकारे घटादिप्रत्यक्षं न कुतस्तत्राह गृह्णातीति॥ आलोकपदमत्र महदनभिभूतोद्भूत
रूपवदालोकार्थकं तथा च महदनभिभूतोद्भूतरूपवदालोकसंयोगश्चक्षुषो द्रव्यग्रहे सहकारि अंधकारे तु न तादृशालोकसंयोगोऽस्ति तस्मान्न प्रत्यक्षं न च महदुद्भूतेति व्यर्थं तेजः
परमाणुचक्षुःसंयोगयोः सत्वात् अनभिभूतेत्यनेनांधकारे सुवर्णप्रत्यक्षे निरासः॥ सुवर्णस्यानभिभूतरूपवत्त्वात् नन्वेवं तेजोन्तरप्रत्यक्षं कथं तेजःसंयो
गाभावादिति चेन्न आलोकाकाशसंयोगेन तत्प्रत्यक्षसंभवादित्यास्तां विस्तरः॥ एवं उद्भूतरूपवत्त्वे घटादेः प्रत्यक्षत्वे तादृशरूपाभावे वायोरपि शब्दादेर
प्रत्यक्षेऽपि प्रत्यक्षविषयवृत्तिरूपमपि सहकारिकारणं बोध्यं॥५७॥ त्वगिन्द्रियस्यापि नयनस्येव द्रव्यं विषयः किं तत्राह उद्भूतस्पर्शवदिति॥ त्वचः त्वगिन्द्रियस्य उद्भू
तस्पर्शवद्द्रव्यमुद्भूतपदं पूर्ववत् सोऽपि च उद्भूतस्पर्शोऽपि च स्पार्शत्वादिसहितः अपिशब्दार्थमाह रूपान्यदिति॥ चक्षुषो योग्यं रूपेन त्वचो योग्यं रूपा

॥क्रियाजातिर्योग्यवृत्तिः समवायश्च तादृशः॥ गृह्णाति चक्षुः संबंधादालोकोद्भूतरूपयोः॥५७॥ उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः॥
॥रूपान्यच्चक्षुषो योग्यं रूपमत्रापि कारणं॥५८॥ द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणं॥ मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः॥५९॥

दन्यत्तु चक्षुषो योग्यं रूपं च द्रव्यादिकं तत्सर्वं त्वगिन्द्रियस्यायोग्यमित्यर्थः अत्रापि द्रव्याध्यक्षे त्वगिन्द्रियजन्येऽपि द्रव्यप्रत्यक्षे रूपं कारणं समवायेन रूपं हेतुः
रूपं विना चक्षुषा वायोः प्रत्यक्षासंभवेऽपि स्पर्शवत्त्वात् त्वगिन्द्रियेण वायोः स्पर्शने संभवतीति रद्दतं मीमांसकानां मतमिति नास्यादमुक्तं इन्द्रियजन्यद्रव्यप्र
त्यक्षत्वावच्छिन्नं प्रति रूपस्य कारणत्वकल्पनेन रूपं विना वायोस्त्वाचप्रत्यक्षासंभवादिति भावः॥५८॥ मनसा संयोगे स्वार्थमात्रे जोन्यरथी इन केभ्य
दुःखादिप्रत्यक्षे चाविशेषमाह त्वचो योगो मनसेति॥ त्वगिन्द्रियस्य मनसा सह त्वगिन्द्रियेणासंयोगो ज्ञानकारणं जन्यज्ञानमात्रे प्रतिकारणमित्यर्थः॥ अन्यथा
सुषुप्तौ मनस्त्वसंनिकर्षादिमात्र यदि तस्यासामग्रीसापेक्षात्ममनसापत्तेः न चेष्टापत्तिः अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्त
तिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते इत्यादिश्रुतिविरोधप्रसंगात् तत्र पुरीतति त्वग्रहितस्य मनसो ज्ञानं प्रत्यसामर्थ्ये
न ज्ञानाभावस्योपपादनात्॥ अस्य सामर्थ्यं त्वक्संयोगाभावादत्रस्य मित्यादि अन्यत्र विस्तरः॥ मनसोऽपि द्रव्यं विषयः स चात्मा मनोमात्रस्य गोचर इति प्रागुक्तः

६ द्रव्यव्यतिरेका
भ्रांध

92
12

२ यद्यपि गुणत्वविशिष्टलौकिकविषयतासंबंधेन प्रत्यक्षं प्रति धर्मादिव्यावृत्तजातिविशेषात्मकेन योग्यविशेषगुणत्वेन हेतुता निर्विकल्पकस्याप
घटमहं जानामीति प्रत्यक्षं च कुं शत्वं तथापि तद्धर्मावच्छिन्नविशेष्यकत्वप्रकारतानिरूपिततत्प्रकारकत्वनिष्ठप्रकारतानिरूपितविशेष्य
तासंबंधेन ज्ञानप्रत्यक्षं प्रति तादात्म्येन तद्धर्मावच्छिन्नविशेष्यतानिरूपिततन्निष्ठप्रकारताशालिज्ञानत्वेन हेतुत्वस्य च दोभूतत्वं चेतिसमर्हा । अंबनानंतरं घटत्वेन

सतो विशेषणमाह । ज्ञानं यन्निर्विकल्पाख्यमिति । घटो यमिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दंडीतिज्ञानवदित्यनुमानेन प्रथमोत्पन्नं विशे
षणज्ञानजन्यत्वानुमितौ विशेषणज्ञानस्य सविकल्पकत्वे ऽनवस्थानान्निर्विकल्पकत्वं सिद्धं तच्च निर्विकल्पकमतीन्द्रियं प्रत्यक्षत्वात् [redacted] । ननु दण्डीति विशिष्टवैशिष्ट्यबुद्धिस्तत्र दण्डज्ञानस्य विशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वं न विशेषणज्ञानत्वे
न मानाभावात् । घटत्वमिति विशिष्टबुद्धौ तु विशेषणविशेष्यसंनिकर्षस्यैव हेतुत्वमिति चेन्न जातिर्वा अवच्छिन्नज्ञानवच्छिन्नप्रकारताद्वयनियमनीयविशिष्टबु
द्धिं प्रति विशेषणज्ञानस्य हेतुतायाः आवश्यकत्वात् स्यादेतत् । विशेषणज्ञानसत्वेपि कदाचित् घट इति घटत्वप्रकारकं कदाचिदत्र घटत्वमिति घटत्ववि
शेष्यकं जायते तत्र किं नियामकमिति चेत् इच्छा विशेषएव सर्वत्र । न च तर्हि सर्वत्रैव विशेषएव नियामकोस्त्विति वाच्यं दृष्टसंभवे अदृष्टकल्प
नायाः अदृष्टत्वात् । अन्यथैककारणपरिशेषापत्तेरित्यास्तां विस्तरः ॥ प्रत्यक्षत्वादिप्रत्यक्षकारणाय प्रत्यक्षे कारणांतरमप्याह । महत्वमिति ।

॥ ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ॥ महत्वं षड्विधे हेतुः प्रत्यक्षे लौकिके तथा ॥ ६० ॥
॥ विषयेन्द्रियसंबंधो व्यापारः षड्विधो मतः ॥ द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ॥ ६१ ॥

घ्राणजादिभेदेन षड्विधेपि प्रत्यक्षे साक्षात् परंपरया वा महत्वं हेतुरित्यर्थः । तत्र द्रव्यसमवाये न आत्मादौ सामानाधिकरण्येनेति विवेकः । तत्र लौकिके
त्यनेनालौकिकप्रत्यक्षनिरासः ॥ ६० ॥ व्यापारमाह । विषयेन्द्रियसंबंधो व्यापार इति अनेन लौकिके विषयस्यापि कारणत्वमित्यपि प्राप्तं । तज्जन्ये सति
तज्जन्यजनको व्यापार इति व्यापारलक्षणम् । तत्र भवेति च विषयेन्द्रियसंयोगो विषयेन्द्रियाभ्यां जन्यो विषयेन्द्रियजन्यज्ञानजनकश्चेति । ननु विषयस्य प्र
त्यक्षं प्रति हेतुत्वे किं मानमिति चेत् अतीतानागतप्रत्यक्षवारणाय तत्कल्पनस्यावश्यकत्वमेवेत्यवेहि । ननु संयोगस्य प्रत्यासत्तित्वं व्यर्थं संयु
क्तसमवायेनैव द्रव्यग्रहसंभवात् । इन्द्रियसंयुक्ते कपालादौ तेषां समवायादिति चेत् न आत्मनि तदसंभवात् तस्यासमवेतत्वादित्यास्तां वि
स्तरः ॥ ६१ ॥

श्री रामो जयति ॥ श्री ॥

२ नव्यसन्निकर्षकारणतयैव तत्तत्कार्यता । विनश्यद्द्रव्यस्य संनि
कर्षादिना तदापत्तिवारणाय पृथक् विषयस्य हेतुता आश्रा
करणकारिकेत्याग्रहस्त्विति । २

आत्मा जानामीत्यनुव्यवसायवारणाय प्रत्यक्षप्रत्यक्षकारणाय जन्यद्रव्यत्वस्य प्रत्यक्षविषयत्वे कारणत्वं महत्त्वस्य चाक्षुषत्वादिति भावः ॥ २

नन्वस्तु सामान्यज्ञानं सामान्यप्रत्यासत्तिस्तथापि येन्द्रियसंबंधं विनापि स्मृत्यादिरूपं सामान्यज्ञानमस्ति तत्र सामान्याश्रयाणां सर्वेषां प्रत्यक्षं स्यात् अत आह । तदि-
न्द्रियजेति । तत्पदं ग्राहकेन्द्रियपरं तदिन्द्रियजन्यो यस्तद्धर्मबोधस्तद्धर्मप्रकारकलौकिकसाक्षात्कारात्मकस्तस्य सामग्री चक्षुःसंयोगालोकादिरूपा तामपे-
क्ष्य तेन सह सा विषयतापेक्षितामत इति । तथा च स्वप्रकारीभूतधूमत्वाद्याश्रयत्वसंबंधेन धूमत्वादिप्रकारकप्रत्यक्षत्वावच्छिन्नं प्रति स्वविषयधूमत्वाद्याश्रय-
त्वसंबंधेन निर्विकल्पकं कारणं यदि सामान्यलक्षणा धूमत्वादिज्ञानत्वेन हेतुत्वेपि न चक्षुःसंयोगादिशून्यकालेपूक्तोक्तेतिप्रसंगः उक्तसामग्रीद्वारा तत्संभ-
वात् । सामान्यलक्षणाजन्यज्ञानं हि संनिकृष्टांशे लौकिकमन्यांशेऽलौकिकं भवतीति चक्षुःसंयोगादिशून्यकाले संनिकृष्टांशे लौकिकसामग्रीविर-
हाद्वेन्यांशेपि सामान्यलक्षणया ज्ञानं न भवतीति भावः ॥ ननु सामान्यस्य तज्ज्ञानस्य वा प्रत्यासत्तित्वं विना किमनिष्टं स्यादिति चेत् पर्वतीयधूमादनुमि-
त्यसंभवप्रसंग एव हि । तथा हि । यदि सामान्यस्य तज्ज्ञानस्य वा प्रत्यासत्तित्वं न स्यात्तदा महानसीयवह्निधूमेन्द्रियसंयोगानन्तरं सहचारग्रहद्वारा

तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्षते ॥ ६६ ॥

व्याप्तिग्रहे कथं पर्वतीयधूमादनुमितिः स्यात् पर्वतीयधूमस्याप्रत्यासन्नत्वे न व्याप्यत्वग्रह इति संक्षेपः ॥ सामान्यलक्षणाभ्युपगमे तु भवति तद्व्या-
प्तिग्रहः महानसीयधूमे धूमत्वेन व्याप्तिग्रहे समस्तधूमत्ववन्निरूपितसामान्यलक्षणया यावद्वह्निधूमभानादिति संक्षेपः । वस्तुतः सामान्यलक्षणानभ्यु-
पगमेपि न हानिः सहचारेण महानसीयधूमे व्याप्तिग्रहे सति पर्वतीयवह्निधूमयोः संनिकृष्टत्वेपि धूमत्वं धर्मितावच्छेदकीकृत्य महानसीयधूमे गृहीताया
व्याप्तेः पर्वतीयधूमे धूमत्वज्ञानेन संवेदितज्ञानविधया स्मारितायाः स्मृतिरूपोपनायकेनोपनीतभानसंभवात् । न चैवं तद्धर्मिणि पूर्वं गृहीतस्यैवोप-
नायकवशात्प्रत्यक्षे भानमिति नियमात् कथं पर्वतीयधूमे व्याप्तिरूपनीतभानं तत्र पूर्वं व्याप्तेरनवगमादिति वाच्यं यद्धर्मावच्छेदेन यद्वत्वं गृहीतं तद्धर्मविशे-
ष्टे तदुपनीतभानं विषये इति नियमात् । व्याप्तिश्च धूमत्वेन व्याप्तेर्गृहीता धूमत्वेनैवोपनीतभानमिति इदमपि व्याप्यतावच्छेदकस्य धूमत्वादेर्व्याप्तिलपक्षेऽप्यथा-

प्त

९४

14

सामान्यज्ञानस्वरूपसामान्यलक्षणसंनिकर्षाद्ज्ञानलक्षणसंनिकर्षविशेषमाह॥ विषयीति॥ ज्ञानलक्षणः ज्ञानात्मकः व्यापारः संनिकर्षः यस्य विषयी इन्द्रियस्य
कस्तस्यैव प्रत्यासत्तिस्तद्विषयकप्रत्यक्षजनकी इन्द्रियसंनिकर्ष इत्यर्थः॥ तथा च सामान्यलक्षणा सामान्यज्ञानं सामान्यधर्मप्रकारकं प्रत्यासत्तिः ज्ञानलक्षणा तु
यद्विषयकं ज्ञानं तेषां प्रत्यासत्तय सुरभि चंदनमित्यादौ सौरभस्य सौरभत्वादेरपि भाने अन्यथा सौरभस्य स्वरूपतत्त्वप्रकारत्वेन तद्धर्मज्ञानात्सा
मान्यलक्षणया तज्ज्ञानासंभवादिति संक्षेपः॥ सौरभत्वसामान्यलक्षणया सौरभमात्रं गृहीत्वा सौरभत्वविशिष्टधर्मज्ञानाभावेन सौरभत्वमात्रस्य सामान्यल
क्षणया निर्णीतासंभवात्। वस्तुतः सामान्यलक्षणया प्रत्यक्षे जननीयेत तद्धर्मप्रकारतानिरूपितविशेष्यताश्रये लौकिकप्रत्यक्षसामग्र्याः सहकारित्वात्
तां विना सामान्यलक्षणया सुरभिचंदनमित्यादौ सौरभस्य सौरभत्वस्य वा भानासंभवात् इत्यनोपपत्तेः ज्ञानलक्षणावश्यकी मन्यत्र विस्तरः॥ योग
जं सूत्रयति॥ योगजेति॥ द्विविध इति॥ योगाभ्यासजनितो योगजः योगश्चित्तवृत्तिनिरोधस्तस्माज्जातो धर्मविशेषो द्विविधो द्विप्रकारक इत्यर्थः॥ योगिभेदे द्वि

॥६७॥

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः॥ योगजो द्विविधः प्रोक्तो युक्तयुंजानभेदतः॥ युक्तस्य सर्वदा भानं चिंतासहकृतोऽपरः॥ ६७॥ व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्॥

॥६८॥

व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्

ध्येनेतस्य द्वैविध्यमुपपादयति॥ युक्तयुंजानभेदत इति॥ युक्ताः जन्मना योगवन्तो ब्रह्मादयः युंजानाः श्रद्धादिसाधनसाध्ययोगवन्तो सेवर्तकादयः स्मृतके तु ॥६७॥२
भवप्रत्ययः अनयोः भवप्रत्ययो विदेहप्रकृतिलयानां। श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषामिति योगसूत्रप्रतिपादितभेदाद्योगजधर्मो विद्विविध इत्यर्थः॥
तयोर्लक्षणमाह॥ युक्तस्येति॥ भवप्रत्ययस्य योगिनः सर्वदा संयमं विनैव भानं सर्वार्थसाक्षात्कारः अपरः उपायप्रत्ययः चिंतासहकृतः चिन्तया संयमेन युक्त
जातिशयः॥ अत एव रूपलवेमवेः परिणामत्रयसंयमादतीतानागतज्ञानमित्यादिसूत्रैर्योगभाष्येषु स्तुत्यादितं॥ ६७॥ प्रत्यक्षखण्डः समाप्तः॥
यथाप्रत्यक्षस्य प्रमाणत्वादनुमानस्यापि फलव्यापारकरणानामावश्यकत्वात्तानि दर्शयति॥ व्यापारस्त्विति॥ परामर्शोऽनुपदमेव वक्ष्यमाणोऽनुमितिरूपफलजनक
व्याप्तिज्ञानस्य व्यापार एवेत्यर्थः॥ तर्हि करणं किं तत्राह॥ करणं व्याप्तिधीर्भवेदिति व्याप्तिप्रकारकहेतुविशेष्यकनिश्चयो धूमो वह्निव्याप्य इत्याकारकः कर
णमित्यर्थः॥ व्यापारवदसाधारणं कारणमेव करणं न फलायोगव्यवच्छिन्नं कारणं॥ तथा सति प्रत्यक्षेऽपीन्द्रियसंयोगस्यैव करणतापत्तेरिन्द्रि

कंकरणं तत्राह· अनुमायामिति· अनुमितावित्यर्थः· तेन मनोपि न करणमिति सूचितं तस्य मानसप्रत्यक्षं प्रत्येव करणत्वादिति संक्षेपः॥ तत्र व्याप्तिविशिष्टतया
हेतो ज्ञानं न करणं किं तु व्याप्तिविशिष्टतया ज्ञायमानो हेतुरेव करणं धूमादिरिति हेतुं पंचम्युपलक्षणे छेदयति वे दोषिकास्तन्न सम्यगित्याह· ज्ञायमानमिति· ज्ञायते
वह्निव्याप्यो धूम इति व्याप्तिविशिष्टतया ज्ञायमानो हेतुरेव करणं धूमादिरिति हेतु प्रतीयते तु निश्चीयमानं लिंगं हेतुः करणं नहि नैवानुमितिकारणमि
त्यर्थः॥ ६८॥ तत्र युक्तिमाह· अनागतादिलिंगेनेति आदिनातीतस्य परिग्रहः अतीतानागतविषयकोयं महानसीयो वह्निव्याप्य इत्याकारकः परामर्शस्तत्रानुमि
त्युदयात्तेनानुमित्यव्यवहितपूर्वक्षणे तयोरसत्त्वात् तथा च तत्र व्यभिचारात् अनागतादिलिंगस्य करणत्वमिति भावः॥ न चैतत्र तत्त्वाग्रमात्रादीनामेव लि
ङ्गत्वमास्तामिति वाच्यं तेषामंशदा तद्व्याप्यत्वेनापरामृश्यमानत्वादिति विस्तरः॥ परामर्शव्यापारस्तत्रैव तत्र कः परामर्श इत्याकांक्षायामाह· व्याप्य

॥६९॥ ॥६९॥।

॥ अनुमायां ज्ञायमानं लिंगं तु करणं नहि॥ ६८॥ अनागतादिलिंगेन न स्यादनुमितिस्तदा॥ व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते॥ ६९॥
व्याप्तिः साध्यवदन्यस्मिन्नसंबंध उदाहृतः॥ ७०॥

५८

स्येति· व्याप्यस्य व्याप्त्याश्रयस्य धूमादेः पक्षवृत्तित्वधीः पक्षेण सह संबंधज्ञानं परामर्श इत्यर्थः· वह्निव्याप्यधूमवान्पर्वत इति ज्ञानसाधारणं धूमत्वादिप्रकारेण व्याप्या
दौ पर्वतत्वादिप्रकारेण वृक्षादिवृत्तित्वज्ञानं व्यापकं चेत्तिचेत्· व्याप्यतावच्छिन्नविशेषताकत्वसंबंधेन व्याप्यत्वविशिष्टपक्षवृत्तित्वज्ञानमिति तात्पर्यात्· व्याप्यतावच्छिन्नविशिष्टा
न्निरूपितपक्षतावच्छेदकावच्छिन्नविषयताशालीति यावत्· भवति हि वह्निव्याप्यो धूमः पर्वते वह्निव्याप्यधूमवान्पर्वत इति ज्ञानं व्याप्यतावच्छिन्नधूमादिनिष्ठवि ८१
षयतानिरूपितपर्वतत्वावच्छिन्नविषयताशालीति लक्षणसमन्वयः॥ ६९॥ ननु व्याप्यत्वं व्याप्तिः सा केत्यत आह· व्याप्तिः साध्यवदिति· अत्र काकांक्षादावतिव्या
प्तिवारणाय वह्निमान्सतीति हेतुविशेषणं बोध्यं· वह्निमान्धूमादित्यादौ साध्यवदन्यस्मिन् जलह्रदादौ तोरवृत्तितया लक्षणसमन्वयः· धूमवान्वह्नेरित्यादौ धूमवद्भि
न्नेऽयोगोलके वह्नेर्वृत्तितया नातिव्याप्तिः· न च धूमवद्भिन्नायोगोलकवृत्तित्वेपि धूमवदन्यजलह्रदे तस्या वृत्तितयाऽतिव्याप्तिवारणं संभवतीति दुर्वारेवेति वाच्यं·

अ साध्यतावच्छेदकपर्याप्तावच्छेदकतानिरूपितावच्छेदकतानिरूपितप्रतियोगिताकभेदवत्त्वमिति यावत्। तेन महानसीयव ह्निप्रति ३
योगितावच्छेदकतायाः शुद्धवह्नित्वावच्छिन्नत्वेपि न हानिः ३
भिन्नमहानसीय १

साध्यवदन्यनिरूपितवृत्तित्वसामान्याभावस्य विवक्षितत्वात्। वह्नौ धूमवदन्यायोगोलकवृत्तित्वस्य सत्त्वेन तथाविधसामान्याभावासत्त्वादिति व्याप्ति वारणासंभवा त्। वृत्तित्वं हेतुतावच्छेदकसंबंधेन बोध्यं तेन वह्निमदन्यस्मिन् धूमावयवे समवायेन जलह्रदे च कालिकेन धूमस्य वृत्तावपि वह्निमान् धूमादित्यादौ नाव्याप्तिः हेतुतावच्छेदकसंबंधेन संयोगेनास्त्वे। साध्यवदन्यत्वं च साध्यतावच्छेदकावच्छिन्नावच्छेदकभेदवत्त्वं नातो वह्निमान् धूमादित्यादौ चालनीन्यायेन वह्निमन्महानसादिभेदमादाय [illegible] महानसीयवह्निमत्वावच्छिन्नप्रतियोगिताकभेदमादाय चाऽव्याप्तिः तादृशभेदस्य प्रदानवे वसत्त्वात्। तत्र च हेतोर्धूमस्यासत्त्वात्। ननु यत्किंचिद्व्यक्तित्वादिना व्यक्तिसाध्यकेऽव्याप्तिः द्रव्यभेदादि प्रतियोगितावच्छेदकतायाः निरवच्छिन्नत्वादिति चेत् न एवं साध्यादिभेदेन व्याप्तेर्भेदादेकव्यक्तिविशेषसाध्यके साध्यनिष्ठनिरवच्छिन्नावच्छेदकताके यादृशे अन्यत्र साध्यता [illegible] वच्छेदकावच्छिन्नावच्छेदकताकेयादृशव्या त्वाददोषात्। साध्यवत्त्वं चात्र साध्यतावच्छेदकसंबंधेन बोध्यं। तेन वह्निमान् धूमादित्यादौ समवायेन वह्निमदन्यस्मिन् पर्वतादौ धूमादेर्वृत्तावेदिर्नव्या

अथवा हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते। ७ ११।

प्तिरितिमंतव्यं। नन्वेवसत्यपि जातिमान् सत्त्वात् द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तिः जातिमदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसंबंधेन समवायेन हेतोरप्रसिद्धेः द्वितीये साध्यवदन्यस्मिन् गुणे सत्ताऽभिन्नविशिष्टसत्तायाः सत्त्वादिति चेत् न हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वीयविशेषणत्वस्य प्रतियोगितावच्छेदकसंबंधत्वे तेन साध्यवदन्यवृत्तित्वाभावस्य विवक्षणे तथा दोषाभावात्। संबंधमध्ये हेतुतावच्छेदकावच्छिन्नत्वं विशेषेण द्वितीये [illegible] प्यदोषस्य चेति
७४ सिपः॥ अत्र दुर्दर्शनत्वं तत्पत्रादित्यादौ साध्यवदन्यस्याऽप्रसिद्ध्याऽव्याप्तेर्नवीनोक्तं लक्षणमाह। अथवेति हेतुमतिनिष्ठा वृत्तिर्यस्य स तथा विरहोऽसं तथाभावः हेतुमन्निष्ठश्चासौ विरहश्चेति हेतुमन्निष्ठविरहस्तस्य अप्रतियोगी हेतुमन्निष्ठविरहाप्रतियोगी तादृशेन साध्येन विधेयेन हेतोरनुमापकस्य ऐकाधिकरण्यमेकाधिकरणवृत्तित्वं व्याप्तिरित्यर्थः। वह्निमान् धूमादित्यादौ धूमवत्पर्वतादिनिष्ठघटादेः तादृशाभावाप्रतियोगिवह्निसामानाधिकरण्यं धूमस्यास्तीति लक्षणसमन्वयः। धूमवान् वह्नेरित्यादौ तु धूमस्य वह्निमदयोगोलकनिष्ठधूमाभावप्रतियोगित्वा

५ १ समवायावच्छिन्नाधेयतीयविशेषणतासंबंधेन जातिमदन्यवृत्तित्वस्याभावो द्रव्यत्वादावस्येवेतिभावः द्रव्यसत्वादित्या
२ सै तु द्रव्यत्ववदन्यगुणादिवृत्तित्वस्य समवायावच्छिन्नाधेयतीयविशेषणतासंबंधेन सत्तायां सत्त्वान्न ... इतिभावः

ताक ३

२ { व्याप्तिसामान्यस्य लक्षणत्वे तत्र धूमत्वविशिष्टे वह्नित्वविशिष्टे
{ तस्य व्याप्तित्वाभावाद् अव्याप्तेर्लक्ष्यस्य तेनैवोच्यः ३२

नन्वेवं वह्निमान् धूमादित्यादौ चालनीन्यायेनाव्याप्तिर्दुर्वारा पर्वतीयवह्नेर्महानसीयादिधूमसमानाधिकरणत्वं तादृशाभावप्रतियोगित्वादिति चेत् न प्रतियोग्यसमानाधिकरणयद्धेतुतावच्छेदकावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यं तद्धेतुतावच्छेदकावच्छिन्ननिष्ठं तत्साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिरित्यर्थे तात्पर्यात् धूमत्वावच्छिन्नवति पर्वतादौ वह्नि[illegible]त्वावच्छिन्नप्रतियोगिताकाभावासत्त्वेन तथाविधघटाभावप्रतियोगितानवच्छेदकत्वाद्वह्नित्वादेरिति वह्निमान् धूमादित्यादौ लक्षणसमन्वयः वह्नित्वावच्छिन्न[illegible]स्य योगोत्पत्त्यादौ धूमत्वावच्छिन्नाभावसत्त्वात् धूमत्वादेस्तथाविधप्रतियोगितानवच्छेदकत्वाभावेन धूमवान् वह्नेरित्यादौ नातिव्याप्तिः अत्र कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिवारणाय प्रतियोग्यसमानाधिकरणत्वमभावविशेषणं तत्र साध्यतावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नो सामानाधिकरण्यं तदपि हेत्वधिकरणे बोध्यं नयास्व साध्यतावच्छेदकसंबन्धेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यसंबन्धी यो हेतुमांस्तन्निष्ठाभावेत्यर्थः अत एव गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिवारणाय प्रतियोगितावच्छेदकावच्छिन्नेति [illegible]वान् द्रव्यत्वादित्यादौ समवायेन [illegible] साध्यतायामतिव्याप्तिवारणाय साध्यतावच्छेदकसंबन्धेनेति वह्निमा-

साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते।

न् धूमादित्यादावव्याप्तिवारणाय भावे हेतुसामानाधिकरण्यनिवेशः सामानाधिकरण्यमप्यत्र संबन्धित्वगर्भं ग्राह्यं न त्वधिकरणत्वगर्भं तेन तादात्म्येन हेतुतानिर्वह्निरित्यत्र स्फुटीभविष्यति तत्रापि धूमसाध्यके धूमरज्जुमयहेतावव्याप्तिवारणाय हेतुतावच्छेदकावच्छिन्नत्वनिवेशः पूर्वसन्निकर्षतत्वविशिष्टे वह्न्यभावे वह्निघटोभयाभावे च दादायासंभववारणाय साध्ये तथाविधाभावप्रतियोगित्वमपहाय तथाविधाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नत्वनिवेशः साध्यतावच्छेदकेति विशेष्योपादानं तु धूमवान् वह्नेरित्यादौ धूमस्य तथाविधाभावप्रतियोगितानवच्छेदकधर्मपत्वावच्छिन्नत्वमादाय अतिव्याप्तिवारणाय मन्तव्यं साध्यसामानाधिकरण्यमप्यत्र साध्यतावच्छेदकसंबन्धेन यः साध्यसंबन्धी तन्निरूपितहेतुतावच्छेदकसंबन्धावच्छिन्नसंबन्धित्वं अतः संयोगादिसंबन्धेन वह्न्यादेः साध्यतायां संयोगादिसंबन्धेन धूमादिहेतौ कालिकादिसंबन्धघटिततथाविधवह्निसामानाधिकरण्येन व्याप्तिव्यवहारप्रसंगः न वा तादात्म्यादिसंबन्धस्याधिकरणत्वानिरूपकत्वेपि तादात्म्येन हेतुसाध्यभावे व्याप्त्यनुपपत्तिरिति न चैवमपि रासभादिनिष्ठतथाविधवह्निसामा-

16

नाधिकरणत्वे व्याप्तिव्यवहारप्रसंगो दुर्वार इति वाच्यं । यद्धेतुतावच्छेदकावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसा
मानाधिकरण्यविशिष्टतद्धेतुतावच्छेदके तद्धेतुतावच्छेदकावच्छिन्ने तत्साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिरिति लक्षणनिष्कर्षे एतदनुपपत्त्यभावात् । नन्वे
वमपि । दण्डिमान् दण्डिसंयोगादित्यादिना व्यक्तिसाध्यतावच्छेदकस्थले ऽव्याप्तिः तत्र तद्दण्डरूपसाध्यतावच्छेदके हेत्वधिकरणवृत्तितत्तद्दण्डविशि
ष्टाभावप्रतियोगितावच्छेदकत्वात् हेत्वधिकरणस्य लक्ष्मीन्यायेन तत्तद्दण्डविशिष्टाभावसत्वादिति चेन्न । तत्र स्वाश्रयसंयोगित्वादिरूपपरंपरासंबंधेन
दण्डत्वस्यैव साध्यतावच्छेदकत्वांगीकारेणानुपपत्त्यभावात् । न चैवं सति दण्डवानित्येवानुमितिः स्यान्न तु दण्डिमानिति वाच्यं । तत्तद्दण्डहेत्वधिकरणवृ
त्त्यभावप्रतियोगितानवच्छेदकत्वक्रमो यावन्नास्ति तावन्न भवत्येव दण्डिमानित्याकारानुमितिरित्यभ्युपगमान्न दोषात् । ननु कालो घटवान् कालपरि
माणत्वादित्यादावव्याप्तिः स्वविशिष्टसाध्यतावच्छेदकसंबंधेन महाकालनिष्ठविशेषणतया महाकालवृत्तित्वान्निरुक्तप्रतियोग्यधिकरणाभावाप्रसिद्धेः । न च
महाकालभेदविशिष्टघटाभावस्यैवात्र प्रसिद्धेः महाकालस्य घटाधिकरणत्वेपि महाकालभेदविशिष्टघटानधिकरणत्वात् महाकाले महाकालभेदा
भावादिति वाच्यं । महाकालस्य दैशिकविशेषणतया महाकालभेदानधिकरणत्वेपि कालिकविशेषणतयाऽधिकरणत्वादिति चेत् । अत्राहुः प्रतियो
गितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेतुतावच्छेदकसंबंधेन यद्धेतुतावच्छेदकावच्छिन्नाधिकरणं तन्निष्ठाभावप्रतियोगितासामान्ये य
त्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नं तद्धेतुतावच्छेदकावच्छिन्नव्यापकं व्यापकसामानाधिकरण्यं व्याप्तिः । भवति हि समवा
यादिना घटत्वाद्यवच्छिन्नानधिकरणं महाकालपरिमाणाधिकरणं महाकालनिष्ठसमवायादिना घटाद्यभावप्रतियोगितासामान्ये घटत्वाद्यवच्छिन्नत्व
कालिकसंबंधावच्छिन्नत्वोभयाभावसत्वात् कालिकसंबंधेन घटत्वावच्छिन्नं कालपरिमाणव्यापकं तत्सामानाधिकरण्यं च कालपरिमाणे इति लक्षण
समन्वयः ॥ तत्र धूमवह्निरिति संनायच्छेदकत्वं वह्निमान् धूमादित्यादौ तथाविधाभावप्रतियोगित्ववति घटादौ पटत्वादेरसत्वात् घटत्वादीनां सर्वेषामेव तादृशप्र
तियोगितान्यूनवृत्तितया तथाविधावच्छेदकाप्रसिद्ध्याऽसंभवापत्तेः ॥ अतः परनारतिरिक्तवृत्तित्वं हि तादृशवह्न्याभावमादाय सर्वेषामेव तथाविधप्रतियोगिता
श्रयतया तदभावाप्रसिद्ध्या वह्निमान् धूमादित्यादावसंभवापत्तेः । न च हेत्वधिकरणवृत्तियत्किंचिदभावप्रतियोगितायाः अनतिरिक्तवृत्तित्वं तद्वाच्यं ।

संयुक्तसमवायतः द्रव्येषु समवेतानां इन्द्रियसंयुक्ते द्रव्ये रूपादीनां समवायात् द्रव्यसमवेतानां गुणकर्मसामान्यानां ग्रहः इत्यर्थः तथा तत्समवायतस्तत्रापि
समवेतानां संयुक्तसमवायेन संयुक्तसमवेतानामपि तत्समवायतः संयुक्तसमवेतसमवायतः इन्द्रियसंयुक्ते द्रव्ये तत्समवेतं रूपादि तत्र रूपत्वादेः समवा-
यात् तत्रापि इन्द्रियसंयुक्तसमवेतेपि रूपादौ समवेतानां रूपत्वादीनां ग्रह इत्यर्थः श्रोत्रस्य समवायतः कर्णशष्कुल्यवच्छिन्ननभसि शब्दस्य समवायात् तेने-
र तद्ग्रह इत्यर्थः ॥ ६१ ॥ तद्वृत्तीनामिति शब्दवृत्तीनां शब्दत्वादीनां समवेतसमवायेन श्रोत्रसमवेते शब्दे शब्दत्वादेः समवायस्तेनैव ग्रह इत्यर्थः ॥ ६
[illegible] अभावे स्वाभाववत्वादेव संयोगसमवाययोर्बाधात् संवन्धान्तरेण तदुपपादयति - विशेषणतयेति द्रव्यादीनां संयोगादिना संबद्धा-
नां विशेषणतारूपसंबन्धेन प्रत्यक्षं भवतीत्यर्थः - विशेषणतास्वरूपसंबन्धविशेष इति प्राचीनाः ॥ अतिरिक्तेति नव्याः ॥ सेयं द्वेधा इन्द्रियविशेषणता तदिन्द्रि-
यसंबद्धविशेषणता च तत्र ग्राह्याभावग्रहे - भूतले घटाभाव इत्यादि ग्रहहेतुरिति विवेकः ॥ ६२ ॥ तावन्मात्रेण न सर्वत्र घटाभावादेः प्रत्यक्षं अत आह

॥ द्रव्येषु समवेतानां तथा तत्समवायतः ॥ तत्रापि समवेतानां शब्दस्य समवायतः ॥ ६१ ॥
॥ तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ॥ विशेषणतया तद्वदभावानां ग्रहो भवेत् ॥ ६२ ॥
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ॥

योग्यानुपलब्धिरूपं विशेषणसामग्रीमाह - यदि स्यादिति - यत्र यस्मिन्नधिकरणे आलोकावच्छिन्ने भूतलादौ यदि स्यात् घटादिर्यदि स्यात्तर्हि भूतलादि-
वदुपलभ्येत इत्येवं प्रसज्यते उपलब्धिरापादयितुं शक्यते उपलब्धिस्तु नास्ति तत्रैव नाभावप्रत्यक्षं भवतीत्यन्वय इत्यर्थः - वस्तुतोऽभावे वस्तुप्रसञ्जनीयेन प्रति-
तप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकोपलम्भाभावरूपा योग्यानुपलब्धिः सहकारिकारणं तदभावादेव तमसि सत्यपीन्द्रियसंबन्धे घटादेर्नाभावप्रत्यक्षं न
जायत इत्यत आह वेति घटवत्प्रदेशायां घटाभावस्य जलपरमाणौ पृथिवीत्वासत्ताभावस्य भूतलादौ पिशाचाद्यन्ताभावादेः संबन्धसत्त्वेऽपि प्रत्यक्षं प्रतियोग्यंशेऽभा-
वांशे वा प्रत्यक्षजनकसामग्रीघटकयोग्यसंनिकर्षाभावेन योग्यानुपलब्धेरभावादिति भावः अन्ये चमनुपलब्धेः प्रमाणान्तरत्वमेवाभ्युपेयन्ते तथा सति विशेषण-
तारूपप्रत्यक्षसंबन्धकल्पनानिवेधनं लाघवमपीति चेन्न विजातीयप्रमाकल्पनापेक्षया प्रत्यासत्त्यन्तरकल्पनायां लाघवात् व्यापारवत्वाभावेन तस्याः

प्र१

विशेषणतासंनिकर्षेण केवलसमवाये प्रत्यक्षानुरोधात् कल्प्यते॰ किं त्विह कपाले घटः समवेत इत्यादि समवायप्रत्यक्षानुरोधादपीत्याह॰ प्रत्यक्षं समवाय
स्येति॰ इन्द्रियसंबद्धे कपालादौ घटादिसमवायस्य विशेषणत्वादिति भावः॥ ६४॥ लौकिकप्रत्यक्षे षोढा संनिकर्षमुपपाद्यालौकिकसाक्षा
त्कारस्योपपादकमाह॰ अलौकिकस्त्विति॰ अलौकिकः लौकिकविषयताशून्यप्रत्यक्षहेतुः व्यापारः संनिकर्षः सामान्यलक्षणः सामान्यमेव लक्ष
णं स्वरूपं विषयो वा यस्येति सामान्यस्वरूपः सामान्यज्ञानात्मको वेत्यर्थः स्पष्टमन्यत्॥ ६५॥ सामान्यमत्रेन्द्रियसंबद्धविशेष्यकज्ञाने प्रकारीभूतं ग्राह्यं
तेन धूलीपटले धूमभ्रमानन्तरं तेन संनिकर्षेण सकलधूमप्रत्यक्षोपपत्तिः इन्द्रियसंबद्धधूमविशेष्यक धूम इति ज्ञानाभावेऽपीन्द्रियसंबद्धधूलीपटलवि
शेष्यके धूम इति भ्रमेऽपि धूमत्वस्य प्रकारत्वात् तेन वह्निसकलधूमप्रत्यक्षादिति वैशेषिकमतं तन्न साधीयः यत्र नानाधिकरणस्थैकव्यक्तिर्घ
टादिकमस्ति सखण्डसामान्यं प्रत्यासत्तिस्तत्र तद्भाव दृश्यापि तया प्रत्यासत्त्यान्तर्घटवतां सर्वेषां ज्ञानानुदयप्रसङ्गात् न चैतन्त्र घटत्व

॥प्रत्यक्षं समवायस्य विशेषणतया मतं॥ ६४॥ अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः॥ सामान्यलक्षणो ज्ञान
॥लक्षणो योगजस्तथा॥ ६५॥ आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते॥ ॥ श्रीरामो जयति॥

तु १ ……… १ तद्व्यक्तिप्रकारेण

मेव तद्व्यक्तिसंबन्धेन परंपरया प्रत्यासत्तिरिति वाच्यं यत्र तद्व्यक्तिसंबन्धेन परंपरया घटत्वादिज्ञानं किं तद्व्यक्तिलोचने तद्व्यक्तिमत्तां ज्ञानं तत्र गत्यभावात्
रत न चैतत्र परंपरया तद्व्यक्तित्वमेव प्रत्यासत्तिरिति वाच्यं तद्व्यक्तेः स्वतद्व्यक्तिरूपघटात्मकतया तस्यापि नष्टत्वात् तस्मान्न सामान्यं प्रत्यासत्तिः किं तु सामान्यज्ञा
नमेवेति नैयायिकमतमाह॰ आसत्तीति॰ सखण्डस्खलनमेदेन द्विविधसामान्यस्य ज्ञाने सामान्याश्रयाणां सर्वेषां भूतभविष्यद्वर्तमानानां संनिहिता
नां प्रत्यक्षे जनयितव्ये इन्द्रियस्य प्रत्यासत्तिरित्यर्थः तत्कालाभावदशायामपि तज्ज्ञानस्य सत्त्वेनैवानुपपद्यते प्रत्यासत्तित्वमिति भावः॰ ननु भवतु सामान्यज्ञानं प्र
त्यासत्तिः सामान्यज्ञाने इन्द्रियसंबद्धेति

श्रीरामो जयति रामस्रामस्॥ ५९॥ ॥५५५६

एकांते नियमे भव ऐकांतः नियत इति यावत् १

४३

वा हेतोराभास इति हेतुदोषो वा हेत्वाभासः पंचधा पंचप्रकारो भवति के ते पंच तत्राह अनैकांतेति अनैकांतः एकस्य साध्यस्य साध्याभावस्य वा ऽ यं नैः
सह चारोऽव्यभिचरितसहचरस्यांतः सहचारस्य नाशः यः स चासौ व्याप्तिग्राहकोपि यस्तेऽस्त्यैकांतः नियमेन साध्य सह ... दृष्टोऽनैकांतो व्यभि
चारी साध्यवदन्यवृत्तिः साध्यासमानाधिकरणः साध्यसंदेहयोग्य इति यावत् विरुद्धः साध्यविरुद्धः यान् साध्यविपरीतेन साध्याभावेन सह वर्तमान
इति यावत् कालात्ययापदिष्टः असिद्धः पक्षेऽनिश्चितः पक्षस्थानिश्चितः प्रतिपक्षकः प्रतिविपरीतः पक्षः कोट्यंतरं यस्य स प्रतिपक्षक इत्यर्थः
कालातीत
साध्याभावसाधकः इति हेतुरिति यावत् कालात्ययापदिष्टः कालस्य साधनसमयस्यात्ययेऽभावेऽपदिश्यते प्रयुज्यत इत्यपदिष्टः कालातीत
कालर २ इति यावत् साध्याभावनिर्णयो यस्मिन् समये स साध्यसाधनैः तस्मिन् समये प्रयुक्तो हेतुर्भवति यस्तु तादृशकालेनातीतः स कालात्ययापदिष्ट
दिष्टः सत्प्रतिपक्षकः बाधितसाध्यक इति यावत् ॥ ५३ ॥ तत्रानैकांतस्य त्रयोक्तं व्यभिचारिणं लक्षयति आद्यः साधारणश्चस्यादिति त्रिधा त्रिप्रकार इत्यर्थः
॥ अनैकांतो विरुद्धश्चाप्यसिद्धः प्रतिपक्षकः ॥ कालात्ययापदिष्टश्च हेत्वाभासास्तु पंचधा ॥ ७३ ॥ आद्यः साधारणस्तु स्यादसाधारणकोऽपरः ॥ तथैवानु
वे २ ॥ पसंहारी त्रिधानैकांतिको भवेत् ॥ ७४ ॥ यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः ॥ यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः ॥ ७५ ॥ तथैवानुपसंहारि
ते कैत्रयस्तत्राह आद्यः साधारणश्चेति एकः साधारण इत्यादिरर्थः ॥ ७४ ॥ साधारणं लक्षयति यः सपक्षे विपक्षे चेति यः हेतुत्वेन प्रयुक्तः सपक्षे नि
श्चितसाध्यवति विपक्षे निश्चितसाध्याभाववति च वर्तते साध्यवद्वृत्तित्वे सति साध्यवदन्यवृत्तिरिति यावत् भवेत्साधारणस्तु सः स तु स एव विप
४२ क्षव्यावृत्तत्वाभावात् व्याप्तिग्रहकाव्यभिचारांशग्रहप्रतिबंधकत्वेन साधारणानैकांतिको भवेत् न तु विरुद्धः सोऽरवृत्तित्वाभावादित्यर्थः असा
धारणमाह यस्तूभयस्मादिति यः हेतुत्वेन प्रयुक्तः उभयस्मात् सपक्षविपक्षोभयात् व्यावृत्तो रहितः निश्चितसाध्यवति सपक्षे निश्चितसाध्याभा
ववति विपक्षे च न वर्तते किंतु पक्षमात्रे वर्तते स त्वसाधारणो मतः स एवासाधारणानैकांतो न तु विरुद्धः पक्षवृत्तित्वाभावात् नापि साधारणः
विपक्षवृत्तित्वाभावादित्यर्थः अनुपसंहारिणमाह केवलान्वयीति केवलान्वयिनास सपरत्वे पुविपमानेन धर्मेण पक्षो यस्य स केवलान्वयीपक्ष
॥ ७५ ॥ कः केवलान्वयिधर्मावच्छिन्नपक्षक इति यावत् ॥ ... ॥ श्रीरामो जयति

अथैकैकमेवोदाहरति। पर्वतो वह्निमानित्यादि। आद्यिमः साधारणानैकान्तिकः पक्षे वर्त्तते विद्यमानस्य सत्त्वस्य सत्ताजातेर्हेतोः सपक्षे निश्चितनिर्त्यवत्वेति
कालादौ विपक्षे निश्चितनित्यत्वाद्वह्निमति महानसे विपक्षे निश्चितरूप्यभाववति जलह्रदे च विद्यमानत्वादिति भावः॥ अपरः असाधारणः गंधव ७६।२
त्त्वस्य हेतोः पृथिव्यसाधारणस्य सपक्षे निश्चितनित्यत्ववति कालादौ विपक्षे निश्चितनित्यत्वाभाववति जलादौ चाविद्यमानत्वादिति भावः॥
अंतिमः अनुपसंहारी अत्र हि सर्वपक्षः सर्वत्वं पक्षतावच्छेदकं तच्च केवलान्वयिसमप्रमेयत्वधर्मवत्वात् एतद्दिशि सर्वस्यैव पक्षत्वे च साध्यसं
देह एवास्ति अन्यच्च व्याप्तिनिश्चयस्य तं नास्त्येवातो व्याप्तिग्रहो न संभवत्येवेति भावः - एतत्त्रयमपि व्याप्तिग्रहप्रतिबंधकत्वेन हेत्वाभासं
ति भावः॥ पदे तु विपक्षवृत्तित्वमेव साधारणत्वं तावन्मात्रस्यैव दूषकत्वात्। विरुद्धस्यापि विरुद्धत्वाज्ञाने विपक्षवृत्तिताज्ञानदशायां साधारण
त्वमेव अन्यथा तस्य हेत्वाभासांतरतापत्तेः एवं सर्वसपक्षव्यावृत्तत्वमेवासाधारणत्वं न तु विपक्षव्यावृत्तत्वमपि व्यर्थविशेषणत्वात्। अनेनोपा

॥ पर्वतो वह्निमान् सत्त्वादिति तत्राद्यिमो भवेत्॥७६॥ पृथिवी नित्या गन्धवत्त्वादिति स्यादपरस्तथा॥ सर्वं तु प्रमेयत्वादिति तत्रान्तिमो भवेत्॥७७॥
यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः॥ गोत्वादिसाध्ये हेतुर्हि पश्वाभत्वादिको भवेत्॥७८॥

थिनाविरुद्धमप्यसाधारणमेव अन्यथा विरुद्धत्वाज्ञाने सर्वसपक्षव्यावृत्तत्वज्ञाते हेत्वाभासांतरतापत्तेः एवं केवलान्वयिधर्मावच्छिन्न
पक्षकत्वमनुपसंहारित्वं केवलान्वयिसाध्यकस्य नादृशस्य सद्धेतुत्वात् किंत्वन्वयव्यतिरेकदृष्टान्तरहितत्वं तत्त्वमिति वदन्ति। तत्र विरुद्धस्य साध्याभा ।७७। २
वव्याप्तत्वे संयोगादिसाध्यकसद्धेतावतिव्याप्तिः स्यादतस्तल्लक्षयति। यः साध्यवतीति। यः हेतुत्वेनाभिमतः साध्यवति साध्याधिकरणे नैवास्ति न वर्त्तते साध्य
सहचरितात्यंताभावप्रतियोगीतियावत्। उदाहरति। गोत्वादीति। यत्र यस्मिन् गोत्वादिसाध्यकानुमाने अश्वत्वादि जातिर्हेतुर्भवति तत्र हेतुर्विरुद्ध
इत्यर्थः एतेनैतद्रूपसाध्यवति अश्वत्वं नैवास्ति अग्निनावह्निमान्द्रव्यत्वादित्यादिपरिग्रहः वस्तुत इदमपि लक्षणं द्रव्यं संयोगादिसाध्यकेतिव्या
प्तं संयोगस्याव्याप्यवृत्तितया द्रव्यत्वसहचरितात्यंताभावप्रतियोगित्वात् अतः साध्यासमानाधिकरणसाध्याभाववत्वासं इदमेव लक्षणं युक्तं संयो
गादिसाध्यकसद्धेतावतिव्याप्तिवारणाय समानाधि

एतस्य साध्याभावानुमितिसामग्रीत्वेन साध्यानुमितिप्रतिबन्धो दूषकताबीजं तेन च साध्यहेतोर्विरोधे सत्प्रतिपक्षे साध्यसत्त्वे हेत्वसिद्धिः हेतुसत्त्वे साध्या-
भावसिद्धौ बाधवद्दोष इति वाच्यं प्रमाणान्तरेण साध्याभावसिद्धावेव बाधस्य दोषत्वात् अत्र तु तेनैवेति विशेषात् ॥७८॥ असिद्धिं
असिद्धिं निरूपयन् निरूपयति आश्रयासिद्धीति । आश्रयस्य पक्षस्यासिद्धिरभावोऽज्ञानं वा आद्या का स्वरूपासिद्धिः
स्वरूपस्य हेतोः पक्षेऽभावः व्याप्यत्वासिद्धिः व्याप्यत्वस्य व्याप्तेरभावः अपरा तृतीया ॥७९॥ उदाहरति पक्षासिद्धीति मणि-
मयो पर्वतो वह्निमानित्याद्यर्थः अत्र मणिप्रचुरः पर्वतः पक्षः स च नास्त्येव न वा ज्ञायते तस्मात्तत्र हेतोः पक्षवृत्तित्वज्ञानासंभ-
वात् पक्षे साध्यज्ञानासंभवाच्च पक्षधर्मताज्ञानस्य साध्यानुमितेश्च प्रतिबन्धकत्वेन हेत्वाभासत्वमिति । स्वरूपासिद्धिमु-
दाहरति ह्रदो द्रव्यमिति अपरा स्वरूपासिद्धिः अत्र धूमवत्त्वे हेतुः स च ह्रदे पक्षे नास्त्येवेति स्वरूपस्य हेतोरभावात् स्वरूपा-
॥ आश्रयासिद्धिराद्या स्यात् स्वरूपासिद्धिरप्यथ ॥ व्याप्यत्वासिद्धिरपरा स्यादसिद्धिस्त्रिधा मता ॥७८॥ पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो
॥ गिरिः ॥ ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ॥८०॥ व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ॥ [illegible]
पक्षतः ॥८१॥
सिद्धिः पक्षे हेतुसत्त्वे पक्षज्ञानरूपपरामर्शप्रतिबन्धकत्वाद्धेत्वाभास इति भावः ॥८०॥ व्याप्यत्वासिद्धिमुदाहरति व्याप्यत्वा-
सिद्धीति अपरा तृतीया दर्शयति नीलधूमेति पर्वतो वह्निमान् नीलधूमादित्यादौ धूमस्येव वह्निव्याप्यत्वसंभवेन नीलवि-
शेषणस्य व्यभिचारावारकत्वेन व्यर्थतया नीलधूमादेर्व्याप्यत्वासिद्धत्वादिति भावः ॥ ननु किंचित् व्यर्थविशेषणत्वस्य
निग्रहस्थानान्तरसंग्राहकतया नीलधूमादौ व्यर्थविशेषणत्वसत्त्वे विद्यमानेऽपि तेन कथं व्याप्यत्वासिद्धिरिति चेत् धूमसमानाधि-
करणात्यन्ताभावप्रतियोगितावच्छेदकत्वाद्वह्नेः नीलधूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वस्य गुरुत्वेन वह्नित्वस्य प्र-
तियोगिताकाभावघटितत्वात् तेरन्यावाद्यस्येव हि प्राचीनैर्गुरुधर्मस्याप्रतियोगितावच्छेदकत्वानभ्युपगमादित्यास्तां ।
हेर तर

सत्प्रतिपक्षं लक्षयति । विरुद्धयोरिति । विरुद्धयोः साध्यवत्त्वसाध्याभाववत्त्वसाधकयोर्हेत्वोः व्याप्तिविशिष्टतयागृहीतयोः परामर्शः पक्षे यः सह सं
बंधज्ञानं सत्प्रतिपक्षताविरोधित्वं तथा परस्परविरुद्धसाध्यकत्वेन विरुद्धहेतुगोचरः परामर्शः सत्प्रतिपक्षत्वं तद्वान्तद्विषयः प्रतिहेतुः सत्प्रतिप
क्षहेत्वाभास इत्यर्थः ॥८१॥ उदाहरति । श्रावणत्वादीति तथाहि । शब्दो नित्यः श्रावणत्वाच्छब्दत्ववदिति । शब्दनित्यत्वानुमानं शब्दोऽनित्यः कृतकत्वा
दिति शब्दानित्यत्वानुमानं अत्र द्वयोरपि दृष्टांतलाभे तुल्यबलात्परस्परेण सत्प्रतिपक्षितत्वे सन् प्रतिकूलः पक्षः कोद्यंतरं प्रतिहेतुर्यः
परामर्शो वा यस्येति व्युत्पत्तेः तथा च प्रतिहेतुमान् प्रतिहेतुपरामर्शवान् वा हेतुः सत्प्रतिपक्षहेत्वाभास इति यावत् एतस्य चानुमितिप्रतिबंधः
फलं यथा प्रकृत एव शब्दत्ववन्नित्यत्वव्याप्यश्रावणत्ववानयं शब्द इति परामर्शसत्त्वेपि घटवदनित्यत्वव्याप्यकृतकत्ववानयं शब्द इति परामर्शांतर
सत्त्वेपि च न नित्यत्वानुमितिः नाप्यनित्यत्वानुमितिर्भवति तुल्यबलतया परस्परं प्रतिबंधात् ननु शब्दो नित्यो वाऽनित्यो वेति संशयात्मानुमितिरस्तु य 3
थास्थाणुत्वपुरुषत्वोभयकोटिज्ञाने उच्चैस्त्वरूपसामान्यधर्मज्ञाने च सति स्थाणुर्वा पुरुषो वेति संशयो भवतीति चेत् न तदभाववद्व्याप्यवत्ताज्ञानस्या

॥ विरुद्धयोः परामर्शो हेत्वोः सत्प्रतिपक्षता ॥८१॥ श्रावणत्वादितो नित्योऽनित्यो जन्यत्वहेतुतः ॥ शब्दादिस्तत्र कथितः प्रकरणसमो बुधैः ॥८२॥ साध्यशू
न्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ॥

नुमितिप्रतिबंधकस्य सत्त्वे कथमनुमितिः स्यादिति वाच्यं लौकिकप्रत्यक्ष इवानुमितिं प्रत्यपि तादृशज्ञानस्य प्रतिबंधकत्वे मानाभावादिति चेन्न तदभाववद्व्याप्य
वत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधादेरनुदयात् लौकिकेन्द्रियजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य लाघवात्प्रतिबंधकतया तत्र संशया
नुमितेरसंभवात् उक्तसंशयस्तु प्रत्यक्षप्रमाणजन्यत्वान्न बाधेन प्रतिबध्यत इति संक्षेपः ॥ अयं च हेत्वाभासो गौतमीयेषु सूत्रेषु प्रकरणसम
संज्ञया कथितः प्रकृष्टं गृहीतव्याप्तिपक्षसंबंधकं करणं लिंगं प्रकरणं तेन प्रतिहेतोर्गृहीतव्याप्तिपक्षसंबंधकत्वेन तुल्यत्वात् तथा च तुल्यबलवि
रोधिपरामर्शकालिकपरामर्शविषयः सत्प्रतिपक्ष इति लक्षणनिष्कर्षः ॥८२॥ बाधं लक्षयति । साध्येति । यत्र यस्मिन्ननुमाने पक्षः पक्षतावच्छेद
कविशिष्टः साध्यहीनः साध्येन रहितः असौ साध्याभाववान् पक्षो बाध उदाहृतः बाधहेत्वाभास इति कालात्ययापदिष्टशब्देन गौतमीयेषु सूत्रे
षु कथित इत्यर्थः शब्दार्थस्तु प्रागेवोक्तः ॥ एतज्ज्ञानं साक्षादनुमितिविरोधि ॥ श्रीराम ॥

उदाहरति - उत्पत्तीति - एतद्यस्मिन्ननुमाने उत्पत्तिकालीनघटे उत्पत्तिकालविशिष्टे घटे गुणानां तत्कार्यत्वात् द्वितीयक्षण एवोत्पत्तिसंभवेन तत्क्षणे तु तः प्रथमक्ष
णे निर्गुणे गन्धप्रागभावस्य सत्त्वात् गन्धादिः गन्धरूपरसस्पर्शादिः साध्यते पृथिवीत्वेनेति शेषः तथा चोत्पत्तिकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वात् संमत
वदित्यनुमाने उत्पत्तिकालावच्छिन्नो घटः पक्षः स च गन्धवान् न भवत्येव द्वितीयक्षण एव गन्धादिसंभवात् अतो बाधितार्थकमिदमनुमानमिति सिद्धं गन्धादिरिसा
दित्यत्र चैतस्यत्रापि यो ऽयं तथाप्यत्र तादृशघटो गन्धादिरित्यर्थः तेन अग्निसत्त्वावच्छिन्नः पर्वतो वह्निमान् धूमात् तन्मूलावच्छिन्नो वृक्षः कपिसंयोगी एतद्वृक्षत्वा
त् वह्निरनुष्णः कृतकत्वात् जलवदित्यादेश्च संग्रहः सिद्धः एतादृशसुगमोदाहरणं विहाय विशिष्टपक्षकबाधोदाहरणं तु व्याप्यस्य व्यभिचारस्वरू
पासिद्धाभ्यामसंकीर्णत्वज्ञापनाय एतेन यत्र पक्षे साध्यं तिष्ठतु वा न वा हेतुस्तु नास्त्येव तत्र स्वरूपासिद्धिरेव यथा ह्रदो वह्निमान् धूमादित्यादौ
यत्र तु साध्यं नास्ति हेतुरस्ति तत्र व्यभिचार एव यथा पर्वतो न वह्निः वह्निरनुष्णः कृतकत्वादित्यादौ च अतो न बाधोदाहरणे दोषसङ्कर इति निरस्तं उ
त्पत्तिकालावच्छेदेन घटस्य गन्धशून्यत्वेऽपि पृथिवीत्वस्य गन्धाव्यभिचारित्वात् अत एतादृशस्थले बाध एव हेत्वाभास इति भावः ॥ अयं निष्कर्ष
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥ ७२ ॥

साधारण्यादव्यभिचाराभावतया असाधारणानुपसंहारिणोः व्याप्तिसंशयाधायकत्वेन व्याप्यत्वासिद्धस्य विशिष्टव्याप्यभावतया व्याप्ति
ज्ञानप्रतिबन्धकत्वं विरोधसत्प्रतिपक्षयोः साध्याभावानुमितिसामग्रीत्वेनानुमितिप्रतिबन्धकत्वं एतावांस्तु तत्र विशेषः विरोधे स एव हेतुः साध्याभा
वानुमितिसामग्री सत्प्रतिपक्षे तु प्रतिहेतुरिति बाधस्य साध्याभावनिश्चयत्वेनानुमितिप्रतिबन्धकत्वं अत्राप्रामाण्यज्ञानानास्कन्दित तदुभि
कतदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतदुभिन्न तद्धानमात्रे विशेषणत्वात् तत्पत्युक्तस्थले लौकिकसन्निकर्षजन्यदो
षविशेषाजन्यविशिष्टबुद्धेरानुमानिकत्वाद् दुष्टं लौकिकसन्निकर्षाजन्यत्वेनैवं तदिन्द्रियजन्यलौकिकविशिष्टबुद्ध्यापत्तिरिति चेन्न तदिन्द्रिय
जन्यविशिष्टबुद्धौ तदिन्द्रियजन्यलौकिकतदभावनिश्चयत्वेन प्रतिबन्धकत्वोपगमात् तदिन्द्रियजन्योपनीतभानात्मकबाधनिश्चयोत्तरं
लौकिकविशिष्टबुद्ध्युदयात् प्रतिबन्धकतावच्छेदककोटौ लौकिकत्वनिवेशाद् इत्यास्तां विस्तरः । आश्रयासिद्धिस्वरूपासिद्ध्योः पक्षधर्मताज्ञानप्रति
बन्धकत्वे उपाधिसत्प्रतिपक्षयोरनुमितिविरोधी व्यभिचारज्ञानद्वारा व्याप्तिज्ञा

तत्र ५

बाधनिश्चयोत्तरं तदिन्द्रियजन्यलौकिक

उपमानं लक्षयति · ग्रामीणस्येति · गवयादिकं पश्यतः अरण्यं कुर्वतो ग्रामीणस्य ग्रामे नरस्य प्रथमतो गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यश्रव
णानंतरं यानगवादीनां सादृश्यधीः गोसदृशो गवयपदवाच्यत्वं शाब्दबोधः सा करणं व्यापारवदसाधारणं स्यादित्यर्थः एतेन गोसदृशतया पिण्ड
प्रत्यक्षं सहकारिकारणमात्रं न करणमिति शांति तं स्मरस्सुतरं सादृश्यप्रत्यक्षे उपमितिप्रभावप्रसंगात् तस्यैतिरूपव्यापारस्याभावात् व्यापारमाह ·
वाक्यार्थस्येति · अतिदिश्यते प्रतिपाद्यते इत्यतिदेशो गोसदृशो गवयपदवाच्य इत्यादिकं तादृशस्य स्मृतिः अनुभूतमपूर्वं गोसदृशो गवय इत्येवं
स्मरणं व्यापारः अतिदेशवाक्यार्थानुभवजन्यत्वे सत्यतिदेशवाक्यार्थानुभवजन्योपमितिजनकत्वात् कारणस्य फलमाह
गवयादिपदानामिति · गोसदृशोयं गवयो गवयपदवाच्य इत्याकारं गवयपदशक्तिज्ञानं आदिपदात् कंटकादिवैधर्म्यज्ञानेन कर
भादिपदवाच्यताज्ञानं दीर्घग्रीवोष्ट्रो उपमा उपमितिः सेव फलमित्यर्थः अयमत्र निष्कर्षः क्वचित्कर्मणि गवयस्योपयोगं ज्ञात्वा तं जि
ज्ञासमानेन ग्रामीणेन कीदृशो गवय इति पृष्टे आरण्यकपुरुषः समाचष्टे यथा गौस्तथा गवय इति अनंतरं तमर्थं मनसि निधाय पश्चिमामय

॥ ग्रामीणस्य प्रथमतः पश्यतो गवयादिकं ॥ सादृश्यधीर्गवादीनां या स्यात्सा करणं स्मृतं ॥८४॥

॥ वाक्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उच्यते ॥ गवयादिपदानां तु शक्तिधीरुपमाफलं ॥ ८५

तः कमपि गलकंबलवर्जितं गोसादृश्यमनुभवतोऽतिदेशवाक्यार्थस्मरणाद्गवयो गवयपदवाच्य इति शक्तिनिर्णयति सा च प्रमाणस्य फलं अन्ये तु कलि
२क तातिदेशवाक्यस्यापि तत्प्रसंगात् नापि यात्रौ स्य अननुभूतपिण्डस्यापि तत्प्रसंगात् नापि मिलितं तद्गुणयत्नं नगरस्थस्य वाक्यं वनस्थस्य प्र
त्यक्षमिति तयोर्भिन्नकालीनत्वेन मेलनस्येवासंभवात् नापि गवयो गवयपदवाच्यो गोसादृश्यत्वात् व्यतिरेके घटवत् · गवयपदं ग
वयवाचकं असति वृत्यंतरे वृद्धैः प्रयुज्यमानत्वात् यथा गोपदं गवां वाचकमित्याद्यनुमानस्य फलं गवयत्वज्ञानं विना तेन रूपेणानुमान
स्यासंभवात् तस्या गवयधर्मविशिष्टे अतिदेशवाक्येन यत्पदवाच्यत्वं ज्ञायते तद्धर्मज्ञानं यद्धर्मविशिष्टे तत्पदवाच्यताज्ञानमुपमिति
रुपमान फलं यथा प्रकृते एवातिदेशवाक्येन गोसादृश्यविशिष्टे गवयपदवाच्यत्वं ज्ञायते गोसादृश्यं च गवयत्वविशिष्टे गवयपदवाच्य

शाब्दप्रमाणं समुत्पादयति · पदज्ञानमिति · पदं वर्णसमूहो गामम् इत्यादिकं तस्य ज्ञानं शाब्दबोधे करणं स्वजन्यव्यापारसंबंधेनासाधारणं का
रणं तच्चक्षुरालोकान्वयमेव शाब्दबुद्धेरनुमितिरिक्तत्वादिति भावः ।। तत्र को व्यापार इत्याशंकायां पदार्थोपस्थितिं विनान्वयबोधाभावात्सैव व्यापा
र इत्याह · द्वारमिति · पदार्थधीः पदजन्यपदार्थोपस्थितिः न च पदजन्येति व्यर्थं प्रत्यक्षेण कलायादिदर्शनेपि पचतीत्युक्ते कलायपाकबो
धापत्तेः सापि न केवलं संबंधविधया पदजन्या अपितु पदमेव स्मर्यमाणत्वात् सो पदजन्या बोध्या अन्यथा घटादिपदात्समवायेना
काशस्मरणे तो घटे नास्तीति वाक्यादाकाशान्वयबोधापत्तेः अथ च गृहीतवृत्तिकस्य पदस्य ज्ञानेन जन्यत्वे सति पदजन्यशाब्दबोधे
जनकत्वरूपं व्यापारत्वमपि चरत तदिति संक्षेपः ।। ननु प्रमाणरीत्या वाक्यजो बोधोऽनुमितिरेवेति सौगताः वैशेषिकाश्च तन्न अननुमित
मसाक्षात्कृतमनुमवे प्रत्येमीति सर्वजनीनानुभवेनानुमित्यादिविलक्षणत्वावधारणात् अतः पदज्ञानफलं शब्दमित्यन्तरमेव तत्र शब्दे
नाह · शाब्दबोध इति · शाब्दप्रमीत्यनुव्यवसायसाक्षिकजातिविशेषवान्प्रत्ययः शाब्दबोधाख्या प्रमा तत्करणं शाब्दः शब्दश्च प्रमाणमनु

।। पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ।। ८१ ।।

मानादिभ्यः पृथगेवेति भावः ।। ननु यदि स्वातंत्र्येणैव शब्दो मानं तदा घटमानयेत्यादितः पामराणामप्यर्थप्रत्ययः स्यात्तत्राह शक्तीति · तथा
च तत्र शक्तिनिश्चयस्य सहकारिकारणत्वात्पामराणां च घटादिशब्दे शक्तेरग्रहान्न बोध इति भावः शक्तिश्चास्मात्पदादयमर्थो बोद्ध
व्य इतीश्वरेच्छारूप ईश्वरसंकेत एव अतएव पामनादिसंकेतितानां गावीगोण्यादिशब्दा नाभिधायकाः तत्र तादृशसंकेतमानाभावात् ·
तर्हि ततोऽन्वयबोधस्तेषां कथमिति चेच्छक्तिभ्रमादिति गृहाण शक्तिश्च न मीमांसकानामिव जातावेव न वा वैयाकरणानामिव
व्यक्तावेव पदाज्जातिव्यक्त्योर्द्वयोरेव बोधदर्शनात् अन्यथा एकतरमात्रस्य अंगीकारे तद्बोधानुपपत्तिः शक्तिग्रहस्य पदार्थधीहे
तुत्वकथनादिति संक्षेपः ।। शक्तिग्रहश्च व्यवहारेण · तथाहि व्युत्पित्सुर्बालो गामानयेति प्रयोजकवृद्धवाक्यश्रवणान

तदंशयोऽन्यवृद्धस्य व्यक्तिमुपलभमानो गामानयनं च दृष्ट्वा प्रयोज्यवृद्धव्यक्तिजनकज्ञानस्यान्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चिन्वन्मान
य गां बधानेति वाक्यं तदेवावापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिरश्वपदस्याश्वत्वविशिष्टे शक्तिरित्यवधारयति स च शक्तिग्रहो नस्ये
नि हि तद्व्यक्तिविषयस्तथा सति देशान्तरीयापूर्वव्यक्तिबोधस्तत्तत्पदादिना न स्यात् तत्र शक्त्यग्रहात् किंतु सामान्यलक्षणया सकलगो
व्यक्तिस्वरूपतिषु शक्तिग्रह समयप्रवृत्तोपस्थितौ सर्वत्रैव तत्तज्जात्यादिविशिष्टे तत्तत्पदानामिति बोध्यम्॥ सर्वत्र व्यवहारस्य कार्यपरत्वा
त्कार्यान्वित एव शक्तिरिति तु न युक्तं का[illegible]षु त्रिभुवनतिलको भूपतिरित्यादौ सिद्धेपि व्यवहारदर्शनेन शक्तिकल्पनादित्यन्यत्र
विस्तरः॥ ८६॥ शक्तिवल्लक्षणापि शब्दवृत्तिस्सा च कीदृशी गंगायां घोष इत्यादौ गंगापदात्तीरे बोधस्यान्यथानुपपत्तेस्तत्र का ल
क्षणेत्यत आह॥ लक्षणेति। गंगापदशक्यो गंगाप्रवाहस्तत्संबन्धस्तीरे लक्षणेत्यर्थः सा त्रिविधा जहल्लक्षणाऽजहल्लक्षणा जहदजह

॥ लक्षणा शक्यसंबन्धस्तात्पर्यानुपपत्तितः॥

ल्लक्षणा चेति यत्र वाच्यार्थस्यान्वयाभावस्तत्र जहदिति यथा गंगायां घोष इत्यादौ यत्र वाच्यस्याप्यन्वयस्तत्राजहदिति यथा छत्रिणो
गच्छन्तीत्यादौ यत्र वाच्यैकदेशत्यागेनैकदेशान्वयस्तत्र जहदजहदिति यथा सोऽयं देवदत्त इत्यादौ गोण्यपि लक्षणैव लक्ष्यमाण
गुणसंबन्धरूपा यथाऽग्निर्माणवक इत्यादौ बीजमाह तात्पर्येति वक्ष्यमाणतात्पर्यानुपपत्तिप्रतिसंधानादित्यर्थः यष्टीः प्रवे
ये शयेत्यादौ भोजनादितात्पर्यानुपपत्त्यैव यष्ट्यादिपदस्य यष्टिधरादौ लक्षणांगीकारात् [illegible] स्थितो यदि बोधे
[illegible] वता तात्पर्यानुपपत्तिरेव लक्षणाबीजं गंगायां घोष इत्यादावपि तीरे घोष इति बोधे एव तात्पर्ये गंगापदे गंगायां मत्स्य इति बो
धे तात्पर्ये तु घोषपद एव लक्षणांगीकारादिति संक्षेपः॥ ॥ ॥ ॥ श्रीरामः

ननु पदार्थोपस्थितेरप्यद्विशाब्दबोधस्तदा घटकर्मत्वमानयनं कृतिरिति वाक्यात् वह्निना सिंचतीति च हरे ऽ हरे ऽ सहोच्चारिते ऽप्योपशाब्दबोधापत्तिरत
आह - आसत्तीत्यादि ।। आसत्तिश्च योग्यता च आकांक्षा च तात्पर्यं च आसत्तियोग्यताकांक्षातात्पर्याणि तेषां ज्ञानं शाब्दबोधे कारणं आसत्त्यादिमे
मे एणाविशाब्दबोधोदयादिति भावः ।। ८१ ।। तत्रासत्तिमाह सन्निधानं त्विति । प्रकृतान्वयबोधानुकूलपदव्यवधानाभाव इत्यर्थः । अत एव
गिरिरग्निमानित्यासन्नं अनासन्नं च गिरिर्भुक्तमग्निमान् देवदत्तेनेति न प्रकृतान्वयबोधानुकूलेत्यर्थः स्यामोदनं पचतीत्यत्रौ
दनेन व्यवहिते पाके स्थाल्यामित्यस्यासन्नत्वनिवारकत्वेन सार्थक्यात् ।। ओदनपदस्य स्थाल्यधिकरणकौदनकर्मकपाककर्तृत्व
न्वयबोधानुकूलत्वात् श्लोकादौ श्लोकपदानामन्वयबोधः किंतु योजनावाक्यादित्याहुः ।। योग्यतामाह - पदार्थ इति । तत्र आसत्त्यादिषु म
ध्ये योग्यता पदार्थे तद्वत्ता एकपदार्थेऽपरपदार्थस्य प्रकृतसंसर्गवत्त्वमित्यर्थः तेन पयसा सिंचतीति योग्यं पयसि सेकसंसर्गस्य सत्त्वात् ।

।। आसत्तियोग्यताकांक्षातात्पर्यज्ञानमिष्यते ।। ८१ ।। कारणं सन्निधानं तु पदस्यासत्तिरुच्यते । पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ।। ८२ ।।
यत्पदेन विना ऽन्यस्याननुभावकता भवेत् । आकांक्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितं ।। ८३ ।।

अयोग्यं तु वह्निना सिंचतीति वह्नौ सेकसंसर्गस्याभावात् देवदत्तो गोमित्यत्र देवदत्ते स्वामित्वरूपसंबंधसत्त्वाद्योग्यतापत्तेः प्रकृते
ति तथा च प्रकृतवाक्यीयप्रतिपाद्यसंबंधवत्त्वमित्यर्थः स च वाच्यभेदः स च नास्तीति न तद्योग्यमिति संक्षेपः ।। ८२ ।। आकांक्षां निर्वक्ति
यत्पदेनेति । येन पदेन विनेत्यर्थः अन्यस्य पदान्तरस्य अननुभावकता अन्वयानुभवाजनकत्वं तेन पदेन सह तस्य पदस्याकांक्षेत्यर्थः
पदस्य पदान्तराभावप्रयुक्तान्वयाननुभावकत्वमित्याकरः । यथा घटमानयेत्यादौ क्रियाकारकादिपदस्य तं विना परस्परमन्वयानु
भवाजननात् इति संक्षेपः ।। तात्पर्यं निर्वक्ति वक्तुरिच्छेति । तस्माद्वनोच्चारयिता तात्पर्यमोनिश्चिते ऽप्यासे । किंच निःसंशयापत्तिता तथा च इदं पदमेतस्मि
न्नर्थे ऽस्यान्वयं प्रत्याययत्विति इच्छा तात्पर्यमित्यर्थः । अस्य निश्चयो हेतुः अस्य संशये व्यतिरेकनिश्चये वा ऽन्वयबोधात् तद्भ्रमेन्वा

नि रे
१ यत्पदं यत्पदेन सह हि शाब्दान्वयबोधकं तत्तदस्य ते न सममिव्याहारतादृशाबोधेच्छाकांक्षेति निष्कर्षः अत उपपतेन तद्वाने कारणमिति
स

न्वयबोधात् वेदेऽशुक्लाद्रौच भगवद्विदे रागतिदिस्यास्तां विस्तरः तस्मात्सिद्धं वृत्त्या पदे रूपस्थितानामर्थानामाकांक्षासत्तियोग्यतादिबलाद्वान्व
तो वाक्यार्थस्यापूर्वस्य भानं स एव शाब्दबोध इति तत्र वाक्यार्थः संसर्गः यथा प्रातिपदिकार्थविभक्त्यर्थयोः स्वधात्वर्थादीनां संबंधः यथा तंडुलं पच
तीत्यत्र तंडुलस्य प्रातिपदिकार्थस्याधेयत्वलक्षणे द्वितीयार्थे विक्लित्तिरूपफले तस्य धात्वर्थे पाके जन्यजनकभावलक्षणः धात्वर्थस्याख्या
तार्थे यत्नेऽनुकूलत्वादिरूपः आख्यातार्थस्य तु पुरुषे समवायलक्षणः संबंधः तथा च तंडुलवृत्तिविक्लित्तिजनकपाकानुकूलयत्नवान्
पुरुष इति शाब्दबोधः ग्रामं गच्छतीत्यादौ ग्रामवृत्तिसंयोगजनकगमनानुकूलयत्नवानिति शाब्दबोधः ग्रामं त्यजतीत्यादौ ग्रामवृत्तिविभाग लि५
जनकत्यागानुकूलयत्नवानिति बोधः रथो गच्छतीत्यादौ त्वाख्यातस्य व्यापारे लक्षणा नामो जानातीत्यादौ त्वाश्रये लक्षणा घटो नश्यतीत्यादौ
वृत्तियोगित्वे लक्षणा रथो गमनानुकूलव्यापारवान् नामो ज्ञानाश्रयत्ववान् घटो नाशप्रतियोगित्ववानित्यादि बोधः स्वयमूह्यः कर्मविभ्या
तस्थले चैत्रेण पच्यते तंडुलादि इत्यत्र कर्मैव मुख्यविशेष्यः तृतीयार्थः कृतिस्तस्याः जन्य[illegible]ता संबंधेन पाकेऽन्वयः पाकस्य जन्यता संबंधे

न द्वितीयावाच्यकर्मत्वे आसाप्राप्तविक्लित्तिरूपफले विक्लित्तिपदार्थेऽन्वयः तस्य च आख्यातपदार्थे कर्मण्यन्वयः तथा च चैत्रवृत्तिकृतिजन्य
पाकजन्यविक्लित्तिशालीतंडुल इति बोधः चैत्रेण पच्यते तंडुलं मैत्र इत्यादौ तु तृतीयार्थो वृत्तित्वं तंडुलकर्मतस्य पाकेऽन्वयः [illegible]
पाकस्यालिजर्थकृतौ तस्याश्च तिङर्थकृतौ तथा च चैत्रवृत्ति तंडुलकर्मकपाकानुकूलकृतिजनकवृत्तिमांश्च मैत्र इति बोधः घटं जानाती
त्यादौ तु धात्वर्थफलस्याभावेन विषयत्वं लक्षणया द्वितीयार्थः तथा च घटविषयकज्ञानाश्रयत्ववानिति बोधः ॥ गां पयो दोग्धीत्या
दौ द्विकर्मकस्थले तु गौणमुख्यकर्मणोर्द्वितीयाया आधेयत्वमर्थः दुहि विभागानुकूलक्रियानुकूलव्यापार[illegible] विशेषः
कर्तृनिष्ठोऽर्थः विभागे गोनिरूपितवृत्तित्वस्य क्रियायां पयोवृत्तित्वस्यान्वयात् गोवृत्तिविभागानुकूलपयोवृत्तिक्रियानुकूलव्यापा
रानुकूलकृतिमानिति शाब्दबोध इत्यादि स्वयमूह्यं ॥ ८९ ॥ शाब्दखण्डः समाप्तः ॥

क्रमप्राप्तं मनो निरूपयितुं मनसि प्रमाणमाह॰ साक्षात्कार इति॰ सुखादीनां साक्षात्कारे करणं मनः साधारणं कारणमिन्द्रियं मन उच्यते तथा च सु
खादिसाक्षात्कार इन्द्रियजन्यः जन्यसाक्षात्कारत्वात् रूपादिसाक्षात्कारवदित्यनुमानेनेन्द्रियजन्यत्वसिद्धौ नहि ईश्वरसमवेतगुणसाक्षात्कारत्वेन
सुखादिसाक्षात्कारस्य चक्षुरादिजन्यत्वाभावात् अतिरिक्तेन्द्रियतया मनसः सिद्धिः। न च सुखादेश्चक्षुरादेरिव मानसे मनस एव करणत्वं सम्भवादिति भावः।
मीमांसकाभिमतविभुत्वस्य खण्डनाय अभिमतम् अणुपरिमाणवत्त्वस्य च विशेषसाधनाय अणुत्वे प्रमाणमाह॰ अयौगपद्यादिति॰ ज्ञानानां चाक्षुषरा
सनादीनाम् अयौगपद्यात् एककालोत्पत्तिकत्वाभावात् तस्य मनसः अणुत्वम् अणुपरिमाणवत्त्वम् इह न्यायवैशेषिकमते युक्तिसिद्धत्वा
दिति भावः। तथा हि महत्परिमाणवत्त्वे विभुत्वप्रसङ्गः। मध्यमापत्तिः नानावयवकल्पनागौरवप्रसंगात् विभुत्वे तु आत्ममनः
संयोगस्यासमवायिकारणस्य ज्ञानानुत्पत्तिप्रसंगः न च विभुद्वयसंयोगो नास्तीति वाच्यं तत्संयोगस्य नित्यत्वेन सुषुप्त्यभावप्रसंगात् पुरीतद्व्य
तिरिक्तात्ममनःसंयोगस्य सर्वदा विद्यमानत्वात् अणुत्वे तु यदा मनः पुरीततं प्रविशति तदा सुषुप्तिः यदा निःसरति तदा ज्ञा

॥ साक्षात्कारे सुखादीनां करणं मन उच्यते ॥ अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहोच्यते ॥ ८५ ॥ अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रि
॥ या गुणाः ॥ रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकं ॥ ८६ ॥ द्रवत्वस्नेहवेगाश्च मता मूर्तगुणा अमी ॥

नोत्पत्तिरित्यणुत्वसिद्धिः। इदं च नानावधानभाजां विजातीयज्ञानयौगपद्यस्य उत्पलशतपत्रभेदवदाशुत्वाद्भ्रमः तदुक्तं तत्र मनसा वेगाति
शयेन भ्रमतीत्येवं क्रमेण ज्ञानान्तरजननादिति संक्षेपः। सुखादिसाक्षात्कारे करणमित्यनेन भोगव्यवस्थोपपत्तये प्रत्येकमात्मन एकै
कं मन इत्यर्थो लभ्यते। नवद्रव्यमुक्तिः ॥ ८५ ॥ द्रव्यग्रन्थः समाप्तः। द्रव्यं निरूप्य गुणान्निरूपयति। अथेत्यादिना। द्रव्याश्रिताः द्रव्यसमवेताः द्रव्य
त्वव्यापकतावच्छेदकसत्ताभिन्नजातिमन्त इति यावत्। निर्गुणा इति निर्गता गुणा येभ्यस्ते निर्गुणाः। निर्गताः क्रिया येभ्यस्ते निष्क्रि
याः। सामान्यवत्त्वे सति कर्मभिन्नत्वे सति गुणकर्मशून्या इत्यर्थः। तथा चैतादृशगुणकर्मरहितत्वं गुणानां साधर्म्यमित्यर्थः। आपाततस्तेन
जात्यादौ द्वितीयेन कर्मण्यतिव्याप्तिः तृतीयेन द्रव्ये इति व्याप्तिनिरासः। आद्ये जातिमत्त्वाभावात् कर्मणः कर्मान्यत्वाभावात् द्रव्यस्य गु
णकर्मरहितत्वाभावात्। गुणमात्रस्य तत्त्वे कर्मभिन्नस्य तं प्राग्व्याख्यातं ॥ ८६ ॥ गुणानां विभज्य साधर्म्यमाह। रूपं रस इति। स्पर्शेति ॥ ८७ ॥

अत्र द्रवत्वमित्यत्र गुरुत्वमपि ग्राह्यं वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः। मूर्तगुणा इति मूर्तगुणत्वम् अमूर्तगुणावृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिमद्गुणत्वं मूर्त्यां तैः

११ इति विशेषाख्यनवैशेषिकाः स्वार्थे ठक् ११

मूर्त

१ तिसंस्कारत्वान्यगुणत्वव्याप्यजातिमत्त्वं गुणत्वम्
मूर्त्यां तेन संयोगादिरूपातिव्याप्तिः

धर्माधर्माविति। बुद्ध्यादयः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः अमूर्तद्रव्यगुणत्वमेतेषां साधर्म्यमित्यर्थः ॥८६॥ संख्यादिश्च वि
भागान्तेति संख्यापरिमाणपृथक्त्वसंयोगविभागा इत्यर्थः उभयेषां मूर्तामूर्तानां मूर्तैरमूर्तैश्च वृत्तित्वादिति [illegible] गुणत्व
व्याप्यजातिमत्त्वं संख्यादीनां साधर्म्यमित्यर्थः संख्यात्वादिकमादाय लक्षणसमन्वयः ॥८७॥ द्वित्वादिकेति। आदिपदात्
त्रित्वचतुष्ट्वादिपरिग्रहः द्विपृथक्त्वादय इति आदिपदात् त्रिपृथक्त्वादिपरिग्रहः अनेकाश्रिता इति एकत्वभिन्नसंख्या
वृत्तय इत्यर्थः ॥८८॥ अतः शेषा इति रूपरसगन्धस्पर्शैकपृथक्त्वपरिमाणैकत्वपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रय
त्नगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः एकैकवृत्तयः एकैकमात्रवृत्तयः स्वाश्रयान्योन्याभावव्यापकाभावप्रतियोगि
न इति यावत् तेन संयुक्तादिसाधारण्यं विशेषगुणानाह बुद्ध्यादिषट्कमिति बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना इत्यर्थः स्पर्शान्ताः

॥ धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च ॥८२॥ एतेऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः ॥ संख्यादिश्च विभागान्त उभयेषां गुणो मतः ॥८३॥
॥ संयोगश्च विभागश्च संख्या द्वित्वादिका तथा ॥ द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः ॥८४॥ अतः शेषगुणाः सर्वे मता एकैक
॥ वृत्तयः बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥ अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः ॥८५॥ संख्यादिरपरत्वान्तो द्रवोऽ

रूपरसगन्धस्पर्शाः द्रवः द्रवत्वं वैशेषिकगुणाः विशेषगुणा एतेषां विशेषगुणत्वं साधर्म्यमित्यर्थः तच्च द्रव्यविभाजकोपाधि
द्वयसमानाधिकरणवृत्तिगुणविभाजकजातिमत्त्वं बुद्धित्वादिमादाय लक्षणसमन्वयः ॥८५॥ सामान्यगुणानाह सं
ख्यादिरपरत्वान्तेति संख्यादिपरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः द्रवः द्रवत्वं असांसिद्धिकः नैमित्तिकः सामान्य
गुणा इति पदार्थः विभाजकोपाधिद्वयसमानाधिकरणवृत्तिजातिमन्तो गुणा इत्यर्थः भवति हि संख्यात्वादिजातिः पृथिवीत्व
जलत्वाद्युपाधिद्वयसमानाधिकरणद्वित्वादिवृत्तिसत्तावत्त्वं च सकलसंख्यादेरिति लक्षणसमन्वयः ॥ ८६ ॥ ८६

८६ एकद्रव्यविभाजकोपाध्यवच्छिन्नवृत्तिवृत्तिः अपरद्रव्यविभाजकोपाध्यवच्छिन्नवृत्त्यवृत्तिजातिमद्गुणत्वमिति यावत् पृथिवीवायु
८६ वृत्तिस्पर्शादौ पृथिवीजलरूपरसयोश्च जातिभेदानभ्युपगमान्नाव्याप्तिरिति भावः ॥ ८६

संख्यादिरपरत्वान्तेति · संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः द्वीन्द्रियग्राह्याः चक्षुस्त्वगुभयग्रहणयोग्या इत्यर्थः स्पर्शान्तशब्द
का इति स्पर्शान्ताश्च शब्दकाश्चेति स्पर्शान्तशब्दकाः स्पर्शान्ताः रूपरसगन्धस्पर्शाः शब्दकाः शब्दाः स्वार्थे कः ॥९०॥ बाह्यैकैकेन्द्रियग्राह्याः चक्षुरादिकैके
न्द्रियमात्रग्राह्याः ग्रहणयोग्यरूपादीनां चक्षुरादिनैव ग्रहणात् · अतीन्द्रियाग्राह्या इत्यर्थः विशेषगुणमध्ये विशेषमाह · विभूनामिति · आकाशात्मनो
र्वैशेषिका गुणाः विशेषगुणाः ये स्युः बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नशब्दाद्याः अकारणगुणोत्पन्नाः समवायिकारणसमवेतगुणेनैका
र्थे ये गुणा उत्पद्यन्ते ते कारणगुणपूर्वकाः गुणाः रूपादयो वस्त्रादौ तन्त्वादिरूपस्य तादृशा आत्मादेः कारणाभावात्स्वाश्रयसमवा
यिसमवेतगुणाजन्यत्वमेतेषां साधर्म्यमिति फलितम् ॥९१॥ अपाकजाश्चेति · पाकजरूपादीनां कारणगुणपूर्वकत्वाभावा
द्यपाकजा इत्युक्तं स्पर्शान्ता इति · अन्यापते तादृशा इति भावः · तेन जलादौ वृत्तीनां तथात्वाभावेपि न हानिः · तथाविधम् अपा

॥ संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥ एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ॥९०॥ संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥
॥ एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ॥ बाह्यैकैकेन्द्रियग्राह्या गुरुत्वादृष्टभावनाः ॥ अतीन्द्रिया विभूनां तु ये स्युर्वैशेषि
॥ का गुणाः ॥ अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥ अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् ॥ स्नेहवेगगुरु

कत्वं कारणगुणोद्भवा इति स्वाश्रयसमवायिसमवेतगुणजन्या इत्यर्थः ॥९२॥ कर्मजा इति · कर्मजन्यवृत्तिगुणत्वव्याप्यजाति
मन्त इत्यर्थः तेन संयोगजसंयोगादावव्याप्तिः ॥९०॥ समवेतसमवायित्वमिति · घटादिगतरूपरसगन्धस्पर्शाः कपालादिगतरूपा
दिभ्यो भवन्ति · एवं परिमाणादिकमप्यूह्यम् · पूर्वपूर्वं तोमवतीये समवायिकारणत्वं साधर्म्यमित्यर्थः तत्र समवायिकारण
वृत्तिगुणविभागजन्यकार्योपाधिमत्त्वं तेन घटरूपादीनामसमवायित्वाभावेपि नाव्याप्तिः · अथेति · आत्मनो वैशेषिके गुणे निमित्तत्वं
स्वादिसन्वयः आत्मविशेषगुणानां निमित्तकारणत्वं साधर्म्यमिति यावत् ॥९०॥ श्रीरामो जयति ॥५॥ ॥५॥ ॥५॥

२४

24

१०२॥

द्विविधैवं कारणता संख्यादिरसमवायिकारणत्वं निमित्तकारणत्वं चेत्यर्थः तथाहि उष्णस्पर्श उष्णस्पर्शस्यासमवायी पाके निमित्तं
... तु गुरुत्वं पतनस्येरसमवायि प्रतिघाते निमित्तं वेगो वेगस्पन्दयोर असमवायी अभिघाते निमित्तं द्रवत्वं द्रवत्वस्यन्दनयो
रसमवायि संग्रहे निमित्तं भेरीदण्डसंयोगः शब्दनिमित्तं भेर्याकाशसंयोगोऽसमवायी वंशदलद्वय विभागः शब्दे निमित्तं
वंशदलाकाशविभागोऽसमवायी तिशब्दे ॥ शेषैः अव्याप्यवृत्तिः तत्वं प्राग्व्याख्यातं ॥ विभुगुणः संख्यादिरपीस्यतद्
कं वैशेषिके इति विशेषपदव्यवच्छेद्यमेः संख्यादिकं तु सामान्यगुण इति भावः संयोगादिद्वयं संयोगविभागौ तथा अव्याप्यवृ
त्तिः सामान्यतः साधर्म्यादिकमुक्त्वा क्रमेणैकैकं विशिष्य निरूपयितुमुपक्रमते चक्षुर्ग्राह्यमिति साधारणमिदं चक्षुश्च क्रमनि
ग्राह्यमित्यर्थः गुणपदस्यानुवृत्त्या गुण इति विशेषणं लभ्यते ततश्चक्षुर्ग्राह्यो गुणो रूपमिति लक्षणं सिद्धं संख्यादावतिव्याप्तिवा

॥ द्विविधैवं कारणता संख्याद्याश्च वैशेषिको भवेत् ॥ वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥ १०२ ॥ चक्षुर्ग्राह्यं भवेद्
॥ रूपं द्रव्यादिरूपलम्भकं ॥ चक्षुषः सहकारि स्याच्छुक्लादिकमनेकधा ॥ ... ...

रणाय मात्रपदं रूपत्वेऽतिव्याप्तिवारणाय गुणपदं इति नवीनो ... चक्षुर्मात्रग्राह्यगुणवृत्ति जातिमत्त्वं तात्पर्यं
तेन चक्षुर्मात्रग्राह्येति जातिविशेषणात् संयोगविशेषोऽव्याप्तिः लक्ष्यतावच्छेदकं तत्र रूपं रूपमित्यनुगतमतिसिद्धं रूपत्वं
जातिविशेषः उपयोगमाह द्रव्यादेरिति द्रव्यगुणकर्मसामान्यादीनामुपलम्भकं साक्षात्परम्परया वा चाक्षुषजनकं
यदि शकारणत्वं तदाह चक्षुष इति चाक्षुषजनने तेजोवच्चक्षुषः सहकारीत्यर्थः विभजते शुक्लादिकमिति शुक्लनीलपी
तरक्तहरितकपिशचित्रभेदात्सप्तविधं सप्रकारमित्यर्थः नव्यास्तु ...

(अभाभिजितसंयोगाद्य)
विभागः २

३ अवयवीतु तत्र निरूपइष्यति न युक्तं

त्ती नीलपीतादिसमुदाय एव चित्रं न तदतिरिक्तमिति चेन्न रूपस्य व्याप्यवृत्तित्वनियमात् तत्समुदायस्य चित्रत्वायोगात् अवतत्र
व्याप्यवृत्त्येव नीलादिकमिति युक्तं वक्तुं पीतावच्छेदेन नीलस्य नीलावच्छेदेन पीतस्योपलंभप्रसंगात् अवयवगतपीतादेरे
वावयविनि प्रतीतिः अवयविनो नीरूपत्वेऽप्रत्यक्षत्वप्रसंगात् नच लौकिकविषयतासंबंधेनावयविन्याश्चाक्षुषप्रतिस्वाश्रय
समवेतत्वसंबंधेनावयवगतमेव रूपादिकं प्रयोजकमिति वाच्यं गौरवात् तस्मात्प्रत्यक्षत्वान्यथानुपपत्त्याऽवयविन्यति
रिक्तचित्रसिद्धिः जलादीति जलपरमाणौ तेजःपरमाणौ च तत्तद्रूपं नित्यं प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगि
अन्यत्तत्कार्यादि वृत्ति पृथिवी वृत्ति च सर्वं सहेतुकं जन्यं अतो न नित्यमित्यर्थः पृथिवीपरमाणुषु पाकेन घटादौ पर
माणुरूपादिनाशरूपोत्पत्तेर्जन्यस्य तस्य क्वचित्पाकेन क्वचिदवयवनाशाच्च नाश इति तत्सर्वमनित्यमेवेति दिक् ॥१०२॥
"जलादिपरमाणौ तन्नित्यमन्यत्सहेतुकं ॥१०३॥ रसस्तु रसनग्राह्यो मधुरादिरनेकधा" सहकारी रसज्ञाया
॥ नित्यतादि च पूर्ववत् ॥१०४॥ ॥॥ ॥॥ ॥॥ ॥॥ ॥ श्री रामो जयति ॥

रसं लक्षयति रसस्त्विति गुणत्वस्यानामूलत्वं इति विशेषणं ज्ञेयं तेन रसनग्राह्यो गुणो रस इति लक्षणं सिद्धं रसत्वे
इति व्याप्तिवारणाय गुणेति लक्षणतावच्छेदकत्वेन प्रत्यक्षसिद्धं रसत्वं जातिः विभजते मधुरादीति मधुरादिर्यस्य
तिक्तादेः समधुरादिः अनेकधा मधुराम्ललवणकटुकषायतिक्तभेदात् षट्प्रकार इत्यर्थः तत्र मधुरः सितादि
दिरम्लं तिंतिड्यादि लवणं सैंधवादि कटु मरीच्यादि कषायो हरीतक्यादिः तिक्तं निंबादिषु तत्सर्वं पृथिव्या
मेव जले तु मधुरमेवेति दिक् उपयोगमाह सहकारीति रसज्ञायाः रसनेन्द्रियस्य रासनजनने सहकारी इत्यर्थः पू

गंधं लक्षयति· घ्राणग्राह्येति· गुणप्रस्तावाद्गुण इति लभ्यं घ्राणग्राह्यो गुणो गंध इत्यर्थः गंधत्वेऽतिव्याप्तिवारणाय गुण इति
ऽतीन्द्रियगंधेऽव्याप्तिवारणाय जातिघटितं बोध्यं लक्ष्यतावच्छेदकं तत्र प्रत्यक्षसिद्धं गंधत्वं जातिः उपकारक इति
घ्राणजन्यज्ञानेकारणमित्यर्थः द्विभजते सौरभश्चासौरभश्चेति स च द्विविधोऽपि गंधोऽनित्य एव ॥१०५॥ स्पर्शं लक्षय
ति· स्पर्शस्त्वगिन्द्रियेति· सावधारणमिदं वाक्यं त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्श इत्यर्थः संख्यादावतिव्याप्तिवारणा
य मात्रपदं स्पर्शत्वे अतिव्याप्तिवारणाय गुणपदं न चातीन्द्रियस्पर्शेऽव्याप्तिः त्वगिन्द्रियमात्रग्राह्य गुण इति
जातिमत्त्वे तात्पर्यात् अत्रापि त्वगिन्द्रियमात्रग्राह्येति जातिविशेषणं न संयोगविभागादावतिव्याप्तिरिति संक्षे
पः लक्ष्यतावच्छेदकमत्र प्रत्यक्षसिद्धं स्पर्शत्वं जातिः उपयोगमाह· त्वचः स्यादुपकारक इति त्वगिन्द्रियजन्यप्रत्यक्षे

॥घ्राणग्राह्यो भवेद्गंधो घ्राणस्यैवोपकारकः॥ सौरभश्चासौरभश्च स द्वेधा परिकीर्तितः ॥१०५॥ स्पर्शस्त्वगि
॥न्द्रियग्राह्यस्त्वचः स्यादुपकारकः॥ अनुष्णाशीतशीतोष्णभेदात्स त्रिविधो मतः ॥१०६॥ काठिन्यादि क्षि
तावेव नित्यतादि च पूर्ववत् ॥५॥

कारणमित्यर्थः द्विभजते अनुष्णाशीतेति न उष्णोऽनुष्णः न शीतोऽशीतः अनुष्णश्चासावशीतश्च अनुष्णाशीतः अनु
ष्णाशीतश्च शीतश्चोष्णश्चानुष्णाशीतशीतोष्णास्तेषां भेदात् त्रिविध इत्यर्थः तत्रानुष्णाशीतः पृथिवीवाय्वोः शीतो ज
ले उष्णस्तेजसि ॥१०६॥ काठिन्यादीति· काठिन्यमादिर्यस्य ततः कठिनत्वं कोमलत्वं चेत्यर्थः तत्र कठिनत्वकोमलत्वे
संयोगविशेषावेवास्मन्मतापत्तेः पूर्ववदिति· जलतेजोवायुपरमाणुस्पर्शा नित्यास्तद्भिन्नस्पर्शास्त्वनित्या इत्यर्थः ॥५॥

एतेषां रूपरसगन्धस्पर्शानां पाकजत्वं तु विजातीयतेजःसंयोगजन्यत्वं तु क्षितौ पृथिव्यामेव पाकेन रसालफलादौ पूर्वरू-
पादितो विलक्षणरूपादेरानुभविकत्वात् न च तत्परमाणौ पूर्वरूपादौ सति संभवति कारणरूपादिना विलक्षणरूपादि-
काले रसालफलादौ पूर्वरूपादिसजातीयरूपाद्यापत्तेः अतः पाकेन परमाणवादौ रूपादिनाशो स्यादिति युक्तो नान्यत्र
न जलतेजोवायुषु मानाभावादिति भावः ॥ १०७ ॥ पीलुपाकवादिनो वैशेषिकाणां मतमाह - तत्रापीति । पृथिव्याम
पीत्यर्थः परमाणौ परमाणावेव पाकः रूपाद्युत्पत्तिसमवायी तेजःसंयोगः तेषां विशेषः पाकनिमित्तस्य घटादावि व
घटादिमध्येऽपि रूपरसादिके विजातीयमनुभवसिद्धं तच्च तत्राग्निसंयोगजं साधयति अग्निसंयोगस्यैव पाक-

॥ एतेषां पाकजत्वं तु क्षितौ नान्यत्र कुत्रचित् ॥ १०७ ॥ तत्रापि परमाणौ स्यात्पाको वैशेषिके नये ॥

त्वात् तथा च वह्निसंनिधानात् परमाणुपर्यन्तं घटावयवानां विभागः ततः परस्परसंयोगनाशः ततो भिन्नेषु त-
तु पूर्वनाशवद समवायिकारणनाशात् घटादिध्वंसः स्वतन्त्राः परमाणवः पच्यन्ते तत्र कदाचित् समानादग्निसंयोगा-
देकजातीयं विलक्षणं च परस्परं विलक्षणरूपमुत्पद्यते पुनः प्राणिकर्मसहकृतं वस्तुगत्यनुरूपादि विच द्व्य-
णुकादिक्रमेण पूर्ववदेव करोतीति तथा च परमाणुरूपाद्द्व्यणुके द्व्यणुकरूपात् त्र्यणुके इति कुलालनिर्मितघ-
टे इव तत्रापि रूपाद्युत्पत्तिरिति सिद्धं पाकात्परमाणावेव रूपादयो न घटादाविति घटादावेव पाकाभ्यु-
पगमे कठिनघटादिमध्यभागे च संयुक्तश्चेत्सन्मध्ये पूर्वरूपादिनाशरूपोत्तरोत्पत्ती न स्यातामिति तन्नयुक्ते

समवायाह: नैयायिकानां

रू ...नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते ॥१०६

किं तु पूर्वत्र्यणुकस्य नाशं विना नैकावयविन्यवयवेषु च परमाणुपर्यंतेषु पाकाधुनापद्यते तदुत्पत्तिरिति पिठरपाकवादिनां नैयायि
कानां सिद्धिस्त्र्यणुकादावपि सिद्धं ... द्व्यणुकांताव्यवयविपरिग्रहः अवयविनाशकस्य नायं समानाभावादवयविन्यपि पा
कः क्रियत इति भावः उभयमते पिपृथिवी परमाणुपुरूपमनित्यमिति भावः ॥१०८॥ संख्यां लक्षयति गणनेति एक
त्वादिव्यवहारासाधारणकारणं संख्येत्यर्थः लक्ष्यतावच्छेदकमत्र एकत्वादौ संख्या संख्येयमनुगतमतिसिद्धा
संख्यात्वजातिः [struck out] नित्येषु नित्यमिति नित्येषु परमाण्वादिषु एकत्वं नित्यं अनित्येषु घटादौ च नित्यमेकत्वमि
॥१०६॥ त्यर्थः ॥ [struck out] द्वित्वादय इति एकत्वान्यसंख्यामात्रमपेक्षाबुद्धिरूपनिमित्तकारणजन्यमित्यर्थः असमवायिक
"नैयायिकानां तु नये घणुकादावपीष्यते ॥१०८॥ गणनव्यवहारे तु हेतुः संख्याभिधीयते। अनेकाश्रयपर्याप्ता एते
"ते तु परिकीर्तिताः ॥१०८॥ द्वित्वादयः परार्द्धांता अपेक्षाबुद्धिजा मताः ॥ अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः"
णं तु द्वित्वं प्रति समवायिगतं यावदेकत्वं बोध्यम् अनेकेति उभयाद्याश्रयपर्याप्ता इत्यर्थः अत उभयादेः प्रत्येकानतिरिक्त
तयाश्रये क्रमविद्वित्वस्य सत्त्वे प्येको द्वाविति प्रत्ययस्य नापत्तिः पर्याप्त्याख्यसंबंधेन द्वित्वस्य प्रत्येकमभावात् एकोन
द्वाविति प्रतीतेः अत एवैतेव्यासज्यवृत्तय उच्यंते इत्यलं विस्तरः ॥११०॥ अपेक्षाबुद्धिनाशाद्वेति चतुर्थक्षणे अ
पेक्षाबुद्धिनाशात्पंचमक्षणे द्वित्वादीनां नाश इत्यर्थः तथाहि प्रथममपेक्षाबुद्धिः ॥ ततो द्वित्वोत्पत्तिः ततो विशेषण
ज्ञानं द्वित्वनिर्विकल्पकात्मकं ततो द्वित्वविशिष्टप्रत्यक्षं अपेक्षाबुद्धिनाशश्च ततो द्वित्वनाश इति ॥ श्रीरामो जयति ॥

अपेक्षाबुद्धिं कारिकयाह · अनेकेति · अयमेकः अयमेकः इत्याद्याकारिकाया तत्तद्व्यक्तिमात्रविषयं त्वावच्छिन्नविशेष्यतानिरूपितैकत्वप्रकारताशा
लिनी बुद्धिः सापेक्षा बुद्धिरित्यर्थः · अत एकत्वांशे निर्द्धर्मितावच्छेदकं तत्त्वज्ञानाच्च द्वित्वाद्युत्पत्तिरिति बोध्यं नन्वस्याः किमिति द्वित्वं प्रति हेतुत्वं क
ल्प्यत इति चेत् कालान्तरे द्वित्वप्रत्यक्षवारणायेति गृहाण अत एव तन्नाशान्नाशोपीति दिक् ॥१११॥ परिमाणं लक्षयति · परिमा
णमिति · परिमितिव्यवहारासाधारणकारणं परिमाणमित्यर्थः लक्ष्यतावच्छेदकं परिमाणत्वं जातिः परिमाणमित्यनुभवसि
द्धा ॥ विभजते · अण्विति · भावप्रधानोऽयं निर्देशः अणुत्वं दीर्घत्वं महत्त्वं ह्रस्वत्वं चेत्यर्थः ॥११२॥ तत् परिमाणं नित्यमित्यत्र परिमा
णमित्यनुषज्यते जायत इत्यत्रापि परिमाणमित्यनुषज्यते ॥११३॥ अनित्यमिति · पूर्वेणान्वितं तथाच अनित्यं परिमाणं संख्या

॥ अनेकैकत्वबुद्धिर्या सापेक्षाबुद्धिरुच्यते ॥१११॥ परिमाणं भवेन्मानव्यवहारस्य कारणं ॥ अणुदीर्घं महद्ध्रस्वमिति तद्भेद ईरितः ॥
॥११२॥ अनित्ये तदनित्यं स्यात् नित्ये नित्यमितीष्यते ॥ संख्यातः परिमाणाच्च प्रचयादपि जायते ॥११३॥ अनित्यं द्व्यणुकादौ तु संख्या
॥ जन्यमुदाहृतं ॥ परिमाणं घटादौ तु परिमाणजमुच्यते ॥११४॥ प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ॥८०॥

जन्यं परिमाणं जन्यं प्रचयजन्यं चेत्यर्थः · तत्र संख्याजन्यमुदाहरति · द्व्यणुकादाविति · आदिना त्र्यणुकस्य संग्रहः द्व्यणुकत्रसरे
ण्वोः परिमाणं नावयवगतपरिमाणजन्यं तथा सति तत्परिमाणस्यावयवपरिमाणापेक्षयोत्कृष्टत्वं स्यात् कपालादिपरि
माणापेक्षया तदारब्धघटपरिमाणस्योत्कर्षदर्शनात् अतो द्व्यणुकपरिमाणं परमाणुगतसंख्यामात्रजन्यं त्रसरेणुपरि
माणं तु द्व्यणुकगतत्रित्वसंख्यामात्रजन्यमिति संक्षेपः परिमाणजन्यमुदाहरति · परिमाणं घटादाविति · घटादिपरिमाणं
कपालादिपरिमाणजन्यमित्यर्थः ॥११४॥ प्रचयजन्यमुदाहर्तुं प्रचयं निर्वक्ति · प्रचय इति · शिथिलाख्यः भूयोवयवावच्छे

द्वित्व

27

पर वारत्तां २

नाश इति· अर्थात् परिमाणस्य आश्रयनाशः समवायिनाशः ततः समवायिनाशादेव परिमाणनाशो न रूपादेरिव पाकादिनापीति भावः ॥११५॥
पृथक्त्वं लक्षयति· संख्यावदिति· इदमस्मात् पृथगिति पृथक्प्रत्ययासाधारणं पृथक्त्वं लक्ष्यतावच्छेदकं प्रत्यक्षसिद्धा पृथक्त्वजातिः । नित्यता-
दिकं संख्यावत् तन्नित्येष्वेकत्वं नित्यमनित्येष्वनित्यमेकत्वमाश्रयद्वितीयक्षणे उत्पद्यते आश्रयनाशान्नश्यति तथा पृथक्त्वं द्विपृथक्त्वमपि द्वि-
त्वादिवद्द्विपृथक्त्वादिकमपीत्यर्थः· नन्वेतस्मात् पृथगिति प्रत्ययस्यान्योन्याभावेनैवोपपत्तेः कथं पृथक्त्वं गुणान्तरं तत्राह· अन्योन्ये
ति· अस्य पृथगिति प्रत्ययस्य ॥११६॥ युक्तिमाह· अस्मादिति· पृथक्त्वस्य सावधित्वात् पृथगिति प्रतीतिर्जायते अन्यो-
न्याभावस्य सावधित्वाभावात् घटः पटो नेति प्रतीतिर्न जायते किंतु घटः पटो नेत्येव· अतस्तयोर्विलक्षणत्वान्नान्योन्याभावे-
न गतार्थतेति भावः ॥ संयुक्तव्यवहारहेतुं संयोगं निरूपयति· अप्राप्तयोरिति· प्राप्तिः संबंधः स च समवायोपीत्यत उक्तम्

॥परिमाणं तूलकादेर्नाशस्त्वाश्रयनाशतः ॥११५॥ संख्यावत्तु पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम् ॥ अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते ॥११६॥
॥अस्मात् पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥ अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः ॥११७॥ कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः ॥ तथो-
॥भयस्पन्दजो जन्यो भवेत्संयोगजोऽपरः ॥११८॥ आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ॥ मेषयोः संनिपातो यः स द्वितीय उदाहृतः ॥११९॥ कपालत-

अप्राप्तयोरिति असंबद्धयोरित्यर्थः आधाराधेयभावानापन्नयोरिति यावत्· स्वरूपकथनमिदं लक्षणं तु संयोग इत्यनुगतप्रतीतिसि-
द्धा संयोगत्वजातिः ॥११७॥ तं विभजते· कीर्तित इति· एकः संयोगः अन्यतरकर्मजः द्वयोर्मध्ये एकक्रियाजन्यः उभयस्पन्दजन्यः उ-
भयक्रियाजन्यः संयोगजः अवयवानवयवसंयोगादवयव्यनवयविसंयोगः ॥११८॥ क्रमेणैतानुदाहरति· आदिम इ-
त्यादिना ॥११९॥ तृतीयमाह कपालेति तृतीयः स्यादिति पूर्वेणान्वितं ननु संयोगजसंयोगे मानाभावः यत्र कपालक्रियया
ते तु संयोगस्ततः कुम्भतंतुसंयोगस्तत्र कपालक्रियाया एव तंतुसंयोगं प्रति कारणत्वं न तु कपालतंतुसंयोगस्येति चेन्न समवा
कुंभ

येन संयोगं प्रति समवायेन क्रियायाः कारणत्वात् कुम्भे समवायेन क्रियायाः अभावेन कुम्भेतं तु संयोगानुपपत्तेः क्रियायाः सामानाधिकर
ण्यसंबन्धेन हेतुतान्तरकल्पनापेक्षया समवायेन संयोगं प्रत्येव हेतुत्वकल्पनौचित्यात् न च कपालसंयोगस्य तंतावच्छेदसमवायेन कपा
लेपि सत्त्वेन कुम्भप्रतियोगिकसंयोगापत्तिरिति वाच्यं कपालप्रतियोगिकत्वविशिष्टकपालसंयोगस्य कारणत्वांगीकारात्
स्वस्मिन् स्वप्रतियोगिकसंयोगानभ्युपगमादित्यास्तां विस्तरः ॥ कर्मजं विभजते कर्मजोपीति ॥१२०॥ आदिमः अभिघाता
ख्यः द्वितीयः नोदनाख्यः विभजते शब्दहेतुं विभागं विभजते विभागोपीति ॥१२१॥ व्याचष्टे एकेत्यादि तत्रैककर्मोद्भवोयः
श्येनशैलयोर्विभागः द्वयकर्मोद्भवो यथा मेषयोः ॥ विभागजं विभजते तृतीयोपीति ॥१२२॥ द्वैविध्यं
व्याचष्टे हेतुमात्रेति कारणमात्रविभागादेकः ॥ कारणाकारणविभागादपरः तत्राद्यो यथा कपालद्वयविभागात् कपाला

४ ॥ अभिघातो नोदनं च शब्दहेतुरिहादिमः ॥ शब्दहेतुर्द्वितीयः स्याद्विभागोपि त्रिधा भवेत् ॥१२१॥ एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः ॥
॥ विभागजस्तृतीयः स्यात्तृतीयोपि द्विधा भवेत् ॥१२२॥ हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः ॥ परत्वमपरत्वं च द्विविधं परिकीर्तितं ॥१२३॥

८२

काशविभागः ॥ द्वितीयो यथा हस्ततरुविभागात् कायतरुविभागः ॥ अत्र सर्वत्र लक्षणं विभागत्वं जातिः विभागा इति प्रत्यक्षसिद्धा ॥
परापरव्यवहारासाधारणकारणे परत्वापरत्वे निरूपयति पर इति परः परत्वसमनुगतमतिसिद्धपरत्वं जातिमत्परत्वं तथाऽपर इति
प्रत्ययसिद्धापरत्वजातिमदपरत्वं च द्विप्रकारमित्यर्थः ॥१२३॥ द्वैविध्यमेव व्याचष्टे दैशिकं कालिकं चेति दिक्कृतं कालकृ
तं चेत्यर्थः विप्रकृष्टदेशमात्रवृत्तित्वे संनिकृष्टदेशमात्रवृत्तित्वबुद्धेर्निमित्तकारणस्य दिक्संयोगस्यासमवा
यिकारणस्य चाभावेन दैशिकतद्द्वयं न संभवतीति किंत्वव्यापकेष्वेवेत्यभिप्रेत्याह मूर्तएवेति दैशिकपरत्वस्य निमित्त

४ परत्वमपरत्वं चेति ४

कारणमाह· परत्वमिति· सूर्यसंयोगभूयस्त्वज्ञानतः बहुतरसूर्यसंयोगान्तरितत्वरूपविप्रकृष्टत्वज्ञानतोऽपेक्षाबुद्धिरूपान्निमित्तकार
णाद्भवति यथा प्रयागस्थस्य प्रयागान्मथुरामपेक्ष्य कुरुक्षेत्रे देशो विप्रकृष्ट इति ज्ञानात्कुरुक्षेत्रे दैशिकपरत्वं॥१२४॥ दैशिकापरत्वस्य नि
मित्तकारणमाह· अपरत्वमिति· तदल्पत्वबुद्धितः अल्पतरसूर्यसंयोगान्तरितत्वरूपसन्निकृष्टत्वज्ञानतोऽपेक्षाबुद्धिरूपान्निमित्तकार
णाद्भवति यथा प्रयागात्कुरुक्षेत्रमपेक्ष्य मथुरा सन्निकृष्टेति ज्ञानतो मथुरायामपरत्वं॥ तयोरसमवायिकारणं दिग्देशसंयोग
बवेसाह तयोरिति· दैशिकपरत्वापरत्वयोः असमवायी असमवायिकारणं तदाश्रये दैशिकपरत्वापरत्वाश्रये॥१२५॥ कालिक
परत्वस्य निमित्तकारणमाह· दिवाकरेति· बहुतरतपनपरिस्पन्दान्तरितजन्मवत्त्वरूपज्येष्ठत्वज्ञानतोऽपेक्षाबुद्धिरूपान्निमि
त्तकारणाद्भवति· यथा लक्ष्मणाद्रामः प्रचुरतरकालेन संबद्ध इति ज्येष्ठत्वज्ञानाद्रामे परत्वं· कालिकापरत्वस्य निमित्तकारण

॥परत्वं सूर्यसंयोगभूयस्त्वज्ञानतो भवेत्॥१२४॥ अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितं॥ तयोरसमवायी तु दिक्संयोगस्त
॥दाश्रये॥१२५॥ दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत्॥ परत्वमपरत्वं तु तदनंतरबुद्धितः॥१२६॥ अत्र त्वसमवायी स्यात्
॥संयोगः कालपिंडयोः॥ अपेक्षाबुद्धिनाशेन नाशस्तेषामुदाहृतः॥१२७॥ ॥१॥ ॥श्रीरामो जयति॥

माह· अपरत्वमिति· तदनंतरबुद्धितः अल्पतरतपनपरिस्पन्दान्तरितजन्मवत्त्वरूपकनिष्ठत्वज्ञानतोऽपेक्षाबुद्धिरूपान्निमित्त
कारणाद्भवति· यथा रामाल्लक्ष्मणोऽल्पतरकालेन संबद्ध इति कनिष्ठत्वज्ञानाल्लक्ष्मणे अपरत्वं॥ एते तु जन्यद्रव्य एव न नित्ये तत्र पूर्वोत्प
न्नत्वरूपज्येष्ठत्वबुद्धेरनंतरोत्पन्नत्वरूपकनिष्ठत्वबुद्धेः कालसंयोगरूपासमवायिकारणस्याभावादिति बोध्यम्॥१२६॥ अ
त्र कालिकपरत्वापरत्वयोः अपेक्षाबुद्धिनाशेनेति स्वनिमित्तकारणविप्रकृष्टत्वादिबुद्धीनां नाशेनेत्यर्थः तेषां कालिकदैशिकपरत्वा
परत्वानां॥१२७॥

क्रमप्राप्तां बुद्धिं निरूपयितुमाह। बुद्धेरिति स्पष्टं॥१२८॥ विभजते अप्रमा चेत्यादि। अप्रमां निरूपयति तच्छून्य इति। तदभाववति तत्प्रकारकं ज्ञानं भ्रम इत्यर्थः। अत्र भ्रमायामप्रमायामतिव्याप्तिवारणाय तदभाववतीति। अभावे भ्रमायाममतिव्याप्तिवारणाय तत्प्रकारकमिति। इदं वायमप्रति व्याप्तिवारणाय ज्ञानमिति। न चेदं संयोगीति भ्रमायामव्याप्तिः मूलावच्छेदेन संयोगाभाववति वृक्षे संयोगप्रकारकत्वादिति वाच्यं। एतदवच्छेदेन यत्संबन्धाभाववत्तावच्छेदेन तत्संबन्धज्ञानस्य विवक्षितत्वात् संयोगाभावावच्छेदेन संयोगज्ञानस्य अप्रमात्वात् संयोगावच्छेदेन संयोगज्ञानस्य प्रमात्वान्नातिव्याप्तिरिति संक्षेपः॥१२९॥ तत्प्रपञ्चः अप्रमाप्रपञ्चः आद्य इति विपर्यास इत्यर्थः। आत्मशरीरादौ गौरोऽहमित्याकारकं यदात्मज्ञानं निश्चयरूपं तद्भ्रमः। शास्त्रानुमानादिभ्यो दुर्बलत्वेनोद्भूयमानशरीरादिभ्यो भेदात्। एवं शङ्खादौ पीतः शङ्ख इत्याकारं ज्ञानमपि भ्रमः। लोकशास्त्रादिभ्यः शङ्खस्यापीतत्वात्॥१३०॥ संशयस्वरूपमाह किंस्विदिति।

॥ बुद्धेः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः॥ अथावशिष्टोऽप्यपरः प्रकारः परिदर्श्यते॥१२८॥ अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते॥ तच्छू
॥न्ये तन्मतिर्या स्यादप्रमा सा निरूपिता॥१२९॥ तत्प्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्तितः॥ आद्यो देहेष्वात्मबुद्धिः शङ्खादौ पीततापत
॥मतिः॥१३०॥ भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते॥ किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः॥१३१॥ तदभावाप्रकारा धीस्तत्प्र

१३१॥ निश्चयलक्षणमाह। तदभावेति। तदभावाप्रकारकं तत्प्रकारकं ज्ञानं निश्चय इत्यर्थः। संशयेऽतिव्याप्तिवारणाय तदभावाप्रकारकमिति। तावन्मात्रे कथिते परज्ञानस्यापि घटनिश्चयत्वापत्तेस्तत्प्रकारकमिति। संशयलक्षणमाह संशय इति। एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः। अत्र पर्वतो वह्निः तदभाववांश्चेति ज्ञानेऽतिव्याप्तिवारणायैकधर्मिकेति। एकधर्मिता वच्छेदकविशिष्टविशेष्यकत्वं विवक्षितमित्यर्थः। तेन पर्वतो वह्निमान् इत्यं कृष्णाभाववानिति ज्ञानव्युदासः। वृक्षः संयोगवान् तदभाववांश्चेति समुच्चयवारणाय विरुद्धेति। विरुद्धत्वं तदर्थः। घटोऽद्रव्यं पृथिवी चेति ज्ञानवारणाय भावाभावेति तद्व्युदासार्थं विरोधप्रयोगः॥१३२॥ ॥ ॥ ॥ श्रीरामो जयति॥

संशयकारणमाह - साधारणादीति - कोटिद्वयसाधारणोऽच्चैस्तरतादीत्यर्थः आदिनाऽसाधारणधर्मस्य परिग्रहः शब्दादावपि संशय
दर्शनात् तथा हि सपक्षव्यावृत्ततया गृहीतशब्दत्वज्ञानाच्छब्दे नित्यानित्यत्वसंशयः आदिशब्देभिन्नेक्रमोपि कोट्यः साधारण्य
र्मज्ञानादिकं संशयकारणमित्यर्थः तेन पर्विज्ञान धर्मीन्द्रियसंनिकर्षविशेषावाद्यदर्शनविप्रतिपत्तिवाक्यादेरपि लाभः क्वचिद्विप्रति
पत्तिवाक्यादपि कोटिद्वयोपस्थित्या संशयदर्शनात् ॥ प्रामाण्याप्रामाण्ययोः परतस्त्वं व्यवस्थापयिष्यन् भ्रमप्रमयोर्गुणा
गुणानन्यत्वं स्पष्टयति - दोष इति - प्रमां प्रति दोषः कारणं ॥ प्रमायां प्रति गुणः कारणमित्यर्थः ॥ १३३ ॥ दोषानाह - पित्तदूर
त्वादीति - आदिना मंडूकवसाञ्जनादेः परिग्रहः नानाविधः अननुगतः क्वचित्पित्तं दोषः इति व्याघातः - तेषां कारणत्वमनु
न्वयव्यतिरेकाभ्यां वेति सिद्धम् तत्र पीतादिभ्रमे पित्तादिदोषः अथ के गुणा इत्याकांक्षायां प्रत्यक्षादौ क्रमशो गुणान् दर्शय

॥ साधारणादिधर्मस्य ज्ञानं संशयकारणं ॥ दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ॥ १३३ ॥ पित्तदूरत्वादिरूपो दोषो नानाविधो मतः ॥ प्रत्यक्षे तु वि
॥ शेष्ये विशेषणवता समं ॥ १३४ ॥ संनिकर्षो गुणस्तु स्यादथ त्वनुमितौ पुनः ॥ पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ॥ १३५ ॥ शक्ये सादृश्यबुद्धिस्तु
॥ भवेदुपमितौ गुणः ॥ शाब्दबोधे योग्यतायास्तात्पर्यस्याथवा प्रमा ॥ १३६ ॥ गुणः स्याद्भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ॥ अथवा तत्प्रकारं यज्ज्ञानं त

ति - प्रत्यक्षे त्विति - प्रत्यक्षप्रमायां विशेषणविशिष्टेन विशेष्येण सहेन्द्रियसंनिकर्षो गुण इत्यर्थः ॥ १३४ ॥ अनुमितावित्ति -
प्रमानुमितौ साध्यवति पक्षे साध्यव्याप्यवत्ताज्ञानं गुणः ॥ १३५ ॥ शक्य इति - उपमितौ शक्ये सादृश्यज्ञानं गुणः शाब्द
बोधे योग्यतायास्तात्पर्यस्य वा प्रमैव गुण इत्यर्थः ॥ १३६ ॥ प्रमां निरूपयति - भ्रमभिन्नमिति - इदं तु लक्षणं निर्विकल्पकसा
धारणं निर्विकल्पकस्य भ्रमभिन्नत्वात् - ननु - यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं तत्र रजतांशेपि प्रमा न स्यात् -
तज्ज्ञानस्य भ्रमभिन्नत्वाभावात् - अत आह - अथवेति - तद्विशेष्यकतावच्छिन्ने तत्प्रकारकत्वं वा ज्ञानं प्रमेत्यर्थः तत्प्रकारकत्वमे
उति व्याप्तिवारणाय तद्विशेष्यकेति रजतत्वप्रकारकमिति ज्ञाने रजतत्वप्रमात्वापत्तिवारणाय तत्प्रकारकेति - रंगरजतयोरिमे

मू॰ तद्विशेष्यकं ॥ १३७ ॥

२ तत्संबंधावच्छिन्नतद्विशिष्टविशेष्यतानिरूपित तत [illegible] तत्प्रकारकप्रमात्वमिति यावत् तत्संबंधा[illegible] छिन्नतद्व ते
इति विशेषणेन संबंधेन तद्विरहिण्यपि कालिकादिसंबंधेन तद्वत्त्वस्य सत्त्वेपि न क्षतिरिति यावत् ॥ एवं च तत्तद्वत्संयोगादिसंबंधेन रजतत्वप्रकारकज्ञानस्य [illegible] पि समवायेन संस

[illegible]

एवं सति निर्विकल्पकं प्रमा न स्यात् तस्य सप्रकारकत्वाभावादित्यत आह ॥ नप्रमेति ॥ प्रमात्वभ्रमत्वे प्रकारकत्वव्याप्ये तस्य तदभावादिति भावः ॥ प्रकारकत्वघटितं प्रमात्वस्य तत्र वाच्यं न गृहीतार्थ यादि त्तत्स्वरूपं प्रमात्वं भ्रमस्येत्यपि प्रमाप्रमात्वे तल्लक्षणमाह ॥ प्रकारतादिशून्यं हीति ॥
आदिना विशेष्यतापरिग्रहः तथा च प्रकारतासामान्यशून्यत्वे विशेष्यतासामान्यशून्यत्वे च तत्त्वमित्यर्थः निष्प्रकारकं निर्विशेष्यकं चेत्य
र्थं निर्विकल्पकमिति यावत् ॥ लक्षणान्तरमाह ॥ संबन्धानवगाहीति संबन्धविषयताशून्यज्ञानत्वे तत्त्वमित्यर्थः ननु चक्षुःसंयोगचक्षुः
संयुक्तसमवायरूपकारणबलात् घटे घटत्वयोगे निवर्तते चक्षुःसंबद्धविशेषणतारूपकारणबलात् घटत्वस्य च घटाभिमानेवायप्रामा
णः प्रतिबध्यते विपक्षता वक्तव्यनेचं गौरवात् तथा चैदं लक्षणमसंभवदस्तामित्थं चेत् नसंबन्धानवगाहीत्यस्य संसर्गमर्यादया
संबन्धानवगाहीत्यर्थे तात्पर्यात् संबन्धनिष्ठसांसर्गिकविषयताशून्यज्ञानत्वे तत्त्वमिति यावत् ॥ इदं च विशिष्टबुद्धेरपि लक्षणं द्र

॥ तस्य भानं प्रमा नापि भ्रमः स्यान्निर्विकल्पकं ॥ प्रकारतादिशून्यं हि संबन्धानवगाहि तत् ॥ प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः ॥ १२८ ॥

ष्टव्यं ॥ तत्प्रकारकबुद्धित्वं संबन्धावगाहिबुद्धित्वं वेति प्रकारताविशेष्यतान्यविषयताविशेषइत्यास्तां विस्तरः ॥ प्रमात्वमिति ॥
मीमांसका हि तद्वद्विशेष्यकत्वावच्छिन्नं तत्प्रकारकत्वरूपं प्रमात्वं स्वतो ग्राह्यमिति वदन्ति स्वतोग्राह्यत्वं च ज्ञानग्राहकव्यापकवि
षयिता निरूपकत्वं ॥ मुरारिमिश्रमते च घटमहं जानामीत्यनुव्यवसायेनैव ज्ञानग्रहे तद्विशेष्यकत्वे सति तत्प्रकारकत्वरूपप्रामाण्यस्यापि
ग्रहात् ॥ प्राभाकरमते स्वप्रकाशज्ञानेनैव स्वस्यानुपपत्त्या प्रकाशस्य विषयितानस्य घटत्वेन घटं जानामीत्यनुव्यवसायरूपत्वाद्विषयावभासकेनैव त
न्मते प्रामाण्यस्यापि ग्रहात् ॥ भट्टमते ॥ विषयता ज्ञाता घटविशेष्यकघटत्वप्रकारकज्ञातताज्ञानयाथार्थ्यं चित्ते घटत्वप्रकारकज्ञाततातो ज्ञा
नयाप्रहृतिर्यत्प्रकारिका ज्ञातता ज्ञा[illegible] ॥ सा तद्विशेष्यकतत्प्रकारकज्ञानजन्या ॥ यथा पटे पटत्वप्रकारिका ज्ञातता ततो ज्ञानानुमाने जैव ज्ञा
तत्वमिति परतस्त्वे मेव प्रामाण्यस्येति भावः ॥ १२८ ॥

३० ७ उत्तेजकलक्षणं प्रतिबंधकतावच्छेदकीभूताभावप्रतियोगित्वम् यथा मंत्राद्यभावविशिष्टमण्यादेर्दाहादेः प्रतिबंधक इति प्रतिबंधकतावच्छेदकीभूतो मंत्राद्यभावस्तत्प्रतियोगीभूतं मन्त्रादि उत्तेजकम् इति तच्च प्रकृते पीति भाव

30

त्तेनुमानात्प्रामाण्यमनुमानप्रसंगः तदानवस्थानुमाने प्रमाणं मनेनैतद्वेन संभवति व्याप्तेर्ग्रहिकाभावेनास्तानादिसतः प्रामाण्यानुमितिप्रयोजकतया व्याप्ति
ग्रहोपायं दर्शयति व्यभिचारस्येति व्यभिचारज्ञानाभावः सहचारदर्शनं च व्याप्तिग्रहे कारणमित्यर्थः तत्र व्यभिचारज्ञानाभावः प्रतिबंध
काभावविधया साध्यसामानाधिकरण्यरूपसहचारस्य दर्शनं स्वातंत्र्येण तथैवान्वयव्यतिरेकतोऽवगमात् तत्र व्यभिचारः साध्याभाव
वद्वृत्तित्वं साध्यसामानाधिकरण्यं च तत्र संदेहे निश्चयः शंका च तदुभयं व्याप्तिग्रहे प्रतिबंधकं तत्रापि व्यापकसामानाधिकरण्यरूप
व्याप्तिग्रहं प्रति साध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञानस्य मणिमंत्रादिन्यायेनैव प्रतिबंधकतेति विवेकः। तत्र शंकापगमः क्वचित्तर्का
त् क्वचित्स्वतः सिद्ध एवेत्यभिप्रेत्याह क्वचिदिति तर्कस्य शंकानिवर्तकत्वं तु व्याप्तिज्ञानकारणीभूतो यो व्यभिचारशंकाविरहस्तत्संपा
दकत्वं तद्वेन च व्यभिचारशंकायाः प्रतिबंधकतायां तर्कस्योत्तेजकतयोत्तेजकाभावविशिष्टव्यभिचारशंकाविरहसंपादकत्वमस्तु

॥ व्यभिचारस्याग्रहोपि सहचारग्रहस्तथा ॥ हेतुर्व्याप्तिग्रहे तर्कः क्वचिच्छंकानिवर्तकः ॥१३७॥

स्यमेव तर्कस्येति भावः तर्कश्चाहार्यारोपविशेषः तत्त्वं च तर्कयामीत्यनुभवसिद्धो मानसत्वव्याप्यो जातिविशेषः स च द्विविधो विषय
परिशोधको यथा पर्वतो यदि निर्वह्निः स्यान्निर्धूमः स्यादित्यादिः व्याप्तिग्राहको यथा यदि धूमो वह्निव्यभिचारी स्या धूमो २
नि परिशोधको व्याप्तिग्राहकश्च विषयपरिशोधको यथा... अनुमितिविषयसाध्यशंकाया विपरीतकोटावनि
द्वह्निजन्यो न स्यादित्यादिः ॥ तत्राद्यः प्रायः पर्वतादिविषयो व्याहार्यशंकामात्रनिवर्तकोऽनुमितिविषय... तथैवानुमानात् आर
ष्टोपस्थापनेन दूषणारोपो बोध्यः द्वितीयः मणिमंत्रादिन्यायेन द्वयादिकं विनाप्याहार्यानाहार्यशंकानिवर्तकः ... हेतुः। तत्रार्थकारणाभावस्य व्य
यथाऽनुमितौ पक्षे साध्यव्याप्यहेतुमत्तापरामर्शो हेतुस्तथा तर्के प्रसंगापाद्यव्याप्यापादकवत्तापरामर्शो हेतुः एवमनुमितौ पक्षविशेष्यकसाध्यसिद्धि
विरहितोत्तरतर्कादिनाऽनुमितिपरामर्शद्वयस्येव पक्षे आपादकवत्तानिश्चयोऽनाहार्यरूपो हेतुः एवमनुमितौ पक्षविशेष्यकसाध्यसिद्धि
रतर्केपि च योग्यताः इष्टापत्तिर्मूलशैथिल्यं विपर्यापर्यवसानं चेति तर्कदोषाः तैरनुमि

श्या २

तोसिद्धिरिव तर्कप्रतिनसाक्षात्प्रतिबंधका किंतु पक्षविशेष्यकव्याप्याभावनिश्चयरूपो बाधनिश्चयो जनकस्तद्विघटितत्वात् अत एव तर्को बाधोऽनुग्राहक एव
सिद्धांतः॥ तथाचापाद्याभावेन वह्निजन्यत्वाभावाभावेनापादकाभावस्य वह्निव्यभिचारित्वाभावस्य सिद्धिः पक्षेऽप्यापादकारोपि प्रतियोगिमत्तानिश्चय
स्य पूर्वसत्वेन नेष्टापत्तिः शंकास्यापि मे वर्तिप्रतितुल्यत्वदर्शनिश्चयो न भवतीति तर्कस्य व्याप्यस्यात्तर्कविघातत्वमिति बोध्यं॰ नन्वयं वह्नेरेव भविष्यतीत्यादिशंका
तर्कविरोधनी स्यात्तत्र तर्कान्तरापेक्षा चेन्निवृत्ताऽनवस्थेति चेत्तन्न बीजांकुरवदिष्टत्वात् अत एवोक्तं तर्कः शंकावधिर्मत इति मूलशैथिल्यं तर्क
मूलव्याप्तिग्राहकमानाप्रवृत्तिः यथा वह्निधूमयोः कार्यकारणभावनिश्चयं विना यदि निर्वह्निः स्यात् निर्धूमः स्यादिति तर्कः कारणीभूतयोरन्वय
व्यतिरेकव्याप्योर्ग्राहकस्याप्रवृत्तिः व्याप्तिनिश्चयप्रतिबंधकत्वं प्रकृतायांदोष इति बोध्यं॰ विपर्ययापर्यवसानं तर्कमूलव्याप्तेः संशयैककोटिमात्रग्रा
हकमानानुपयोगित्वं यथा धूमो यदि वह्निजन्यो न स्याद्वह्निजन्यत्वे तदितरजन्यत्वे वा जन्यस्यादित्यस्येति संक्षेपः॥ उक्तमाद्विविनिगमक

॥साध्यस्याव्यापको यस्तु हेतोर्व्यापकस्तथा॥ ॥

त्वेनातानुगतगौरवप्रतिबंधनोऽविनिगमनातु न तर्कः प्रसंगात्मकत्वात् तथाहि बाधकापोद्योनियमउत्सर्गः सोयं भूयः साहचर्यरूपपद्य
न तर्कः अविनिगमस्तु युगपदुपस्थितयोः प्रमाणभावादेकतरधारणाभावः अस्य च प्रमाणभावपदव्यदेशो न त्वतिरिक्तः लाघवं गौरवं तु स्वरूपप
रिच्छेदकत्वे स्वत्वे संभवति गुरुरूपपरिच्छेदकत्वं च प्रमाणानां स्वभावविशेषो न तु तर्को प्रतिरेकिस्वार्थांतरं विरोधिपरत्वे तु तदृत भूतेवमनोविषये
तु अप्रोद्भिन्नस्य प्रायावित्वकल्पस्याभावः। प्रमाणभावांतर्गत एवेति संक्षेपः॥१३६॥ व्यभिचारग्रहो व्याप्तिग्राहकेऽनुकूले व्यभिचारज्ञानं च हे
ताबुपाधिस्मरणप्रसंगसंगत्योपाधिं निरूपयति॰ साध्यस्येति॰ साध्यत्वाभिमतेव्यापकत्वे सति साधनत्वाभिमताव्यापक इत्यर्थः यथा धूमवानू
वह्नेरित्यत्रार्द्रेन्धनसंयोगो धूमस्य व्यापको वह्नेरव्यापकः व्यापकत्वं तद्वन्निष्ठात्यंताभावाप्रतियोगित्वं अव्यापकत्वं तद्वन्निष्ठात्यंताभाव
प्रतियोगित्वं भवति चार्द्रेन्धनसंयोगो धूमवन्महानसादिनिष्ठाभावाप्रतियोगी वह्निमदयोगोलकनिष्ठाभावप्रतियोगीति लक्षणसमन्वयः

सोपाधिश्चतुर्विधः। केवलसाध्यव्यापकः पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकः उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति। तत्राद्य
आर्द्रेन्धनसंयोग उक्त एव। द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वं। तृतीयो यथा
ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नविनाशित्वव्यापकं भावत्वं। चतुर्थस्तु प्रागभावो विनाशी प्रमेयत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वे व्यापके
भावत्वं। एतच्चतुष्टयानुगमकं निष्कर्षं प्रतिजानीते॥ तस्य निष्कर्षोऽयमिति तस्य उपाधेः ॥१४०॥ सर्वे इति येषां उपाधीनां पक्षाश्रये एकस्मिन्नधिकरणे हे
तोः स्वसाध्यव्यभिचारिता स्वं उपाधिः स्वं च साध्यं च स्वसाध्ये तयोर्व्यभिचारिता ते सर्वे साध्यसमानाधिकरणाः साध्याधिकरणे विद्यमानाः साध्यव्याप
काः सदुपाधयो भवंतीत्यर्थः। एतत्प्रये व्यभिचारितेत्यत्र निरूप्यत्वं व्यभिचारनिरूपकहेत्वधिकरणत्वं एतेन साध्यव्यापितमतमुपाध्यनधि
करणहेतुमन्निष्ठयत्किंचिद्धर्मावच्छिन्नं यासामिति तोपितं साध्यसमानाधिकरणा इत्यनेनोपाध्यधिकरणे साध्याधिकरणयोरेकत्वं कथनात्

॥स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्श्यते ॥१४०॥ सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः। हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता॥१४१॥

साध्याधिकरणवृत्तिधर्मस्योपाधिसामानाधिकरण्यं तोपितं तथा च स्वावच्छिन्नानधिकरणहेतुमन्निष्ठयत्किंचिद्धर्मावच्छिन्नसाध्यसमानाधिकरण
यावद्धर्मा यद्धर्मावच्छिन्नसमानाधिकरणास्तद्वत्त्वमुपाधित्वमिति यावत् स्वं उपाधितावच्छेदकं तत्तदिति हि आर्द्रेन्धनत्वावच्छिन्नानधिकरण व
ह्निमन्निष्ठद्रव्यत्वावच्छिन्नसमानाधिकरणा यावद्धर्मा आर्द्रेन्धनत्वावच्छिन्नसमानाधिकरणा अतस्तादृशार्द्रेन्धनमुपाधिः। एवं रूपत्वाव
च्छिन्नानधिकरणप्रत्यक्षस्पर्शाश्रयत्ववन्निष्ठबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वसमानाधिकरणा यावद्धर्माः रूपत्वावच्छिन्नसमानाधि
करणा अतो रूपवत्त्वमुपाधिः। एवं भावत्वानधिकरणजन्यत्ववन्निष्ठजन्यत्वावच्छिन्नविनाशित्वसमानाधिकरणभाववत्त्वसमानाधिकर
णा अतो भावत्वमुपाधिः। एवं चतुर्थेपि भावत्वानधिकरणप्रमेयत्ववन्निष्ठजन्यत्वावच्छिन्नविनाशित्वसमानाधिकरणाभावत्वसमानाधिक
रणा अतो भावत्वमुपाधिरिति लक्षणसमन्वयः। सद्धेतौ तु एतादृशो धर्मो नास्ति तादृशसाध्यसमानाधिकरणो यावद्धर्मो यद्धर्मावच्छिन्नसमा

नाधिकरणः स्यात् सद्धेतौ महानसत्वाभावेऽतिव्याप्तिवारणाय पक्षस्य गोयावद्धिति धर्मविशेषणं अवच्छिन्नसाध्यव्यापकोपाधिसंग्रहाय यत्किं
चिद्धर्मावच्छिन्नेति । इयं जातेरियाद्यौ गुणकर्मान्यत्वविशिष्टसत्वस्योपाधित्वसंगमनाय स्वावच्छिन्नेति । तथा च विशिष्टस्यातिरेकेन सत्वाधिक
रणजात्यधिकरणाप्रसिद्धावपि विशिष्टसत्तात्वावच्छिन्नाधिकरणजातिमद्गुणनिष्ठगुणद्रव्यान्यतरत्वावच्छिन्नद्रव्यत्वसमानाधिक
रणयावद्धर्मत्वांविशिष्टसत्तात्वावच्छिन्नसमानाधिकरणत्वात् तत्रापि लक्षणसमन्वय इति न कोपि दोषः॥ अधिकेत्यस्य स्थले सत्तार्केरत्वा
करेदूषयं। ~~[illegible]~~ उपाधेर्दूषकताबीजमाह । व्यभिचारस्येति । उपाधिव्यभिचारेण साध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः
वह्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धनव्यभिचारित्वादिति अवच्छिन्नसाध्यव्यापकोपाधिस्थले तु अयं प्रकृतसाध्यव्यभिचारी अ
मुकधर्मावच्छिन्नसाध्यव्यापकोपाधिव्यभिचारित्वादित्यादिक एव प्रयोग इत्यन्यत्र विस्तरः॥१४१॥ व्यभिचारस्यानुसंधायकत्वेनोपाधिरनु

॥ व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम्॥१४१॥ शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते॥ अनुमानगतार्थत्वादिति वैशेषिकं मतम्॥१४२॥
पृथक्पूर्व मानेर

मानएव देवोनेन शब्दादावपीति तार्किकाः तन्मतमाह शब्दोपमानयोरनुमानएवांतर्भावात् । तथा हि पदार्थसंसर्गबोधः शाब्दप्रमा सा च एतानि
पदानि स्वस्मारितार्थसंसर्गवन्ति आकांक्षादिमत्पदकदंबकत्वात् गामभ्याज दंडेनेतिमद्वाक्यवदित्यनुमानात् तथा एते पदार्थाः मिथः संसर्गवंतः आ
कांक्षादिमत्पदकदंबोपस्थापितत्वात् संमतवदित्यनुमानाद्भवति एवमुपमितिरप्यनुमानादेव भवति तथा हि गवयादिपदानां शक्तिसा
मुपमितिः सा च गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वात् गोपदादिवदिति । सामान्यतः सप्रवृत्तिनिमित्तकत्वेन गृहीते प्रवृत्तिनिमित्तं
चार्थान्तरं सादृश्यं तद्विशिष्टएव सर्वेषां गवयादिप्रयोगादित्यनुमानान्तरेणोत्पन्नोपमितिरपि पक्षधर्मतारूपगोसादृश्यग्रहाद्भवति तस्मा
त् शाब्दोपमित्योरनुमितौ तत्कारणयोः शाब्दोपमानयोरनुमानएवांतर्भावान्न पृथक्प्रामाण्यमिति वैशेषिकमतं दूषयितुमुपन्यस्यति । शाब्द

रूपप्रतितंत्रसम्यगिति॰ कुतः व्याप्तीति॰ सानंदिनापिशब्दबोधस्यानुभविकत्वादित्यर्थः प्रसिद्धार्थकत्वाद्यो दोषाद्श्रवणानंतरं व्याप्तिज्ञानकल्पन
संभवेप्यपूर्वार्थकत्वाद्यो दोतत्स्यनासंभवादितिभावः॥ व्याप्तिस्मरणं व्याप्तिव्यवस्थामाह॰ द्विविध्यमिति॰ यत्र धूमस्तत्राग्निरित्यन्वयेन यत्रा
ग्निर्नास्ति तत्र धूमो नास्तीति व्यतिरेकेणान्वयाद्वे विधमानत्वाद्विप्रकारत्वमित्यर्थः॥१४२॥ अन्वयेति॰ हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिर्व्या
पकसामानाधिकरण्यादिरूपा सा तस्मिन्प्रथमे रूपितेत्यर्थः॥ व्यतिरेकादिति॰ साध्याभावहेत्वभावयोर्व्यतिरेकव्याप्तिरिति शेषः॥ तौ निर्वक्ति॰ सा
ध्याभावेति अन्वये यथाप्रकृतदभावे इत्यर्थः हेत्वभावस्य अन्वये यथाप्यं तदभावस्य अत्र साध्याभावव्यापकत्वकथनं हेतोः साध्याभावव्याप
कीभूताभावप्रतियोगित्वरूपव्याप्तिलाभाय तादृशाभावप्रतियोगितेन पक्षधर्मतानिश्चयस्येव व्यतिरेकानुमितिहेतुत्वात्॥ तथानुमा
नं त्रिविधं केवलान्वयि केवलव्यतिरेक्यन्वयव्यतिरेकिभेदात् तत्र केवलान्वयि साध्यकं केवलान्वयि॰ यथा इदं वाच्यं प्रमेयत्वादिति

॥ तत्र सम्यग्विनाशाप्तिवोधंशाद्वादिरोधतः॥ द्विविध्यं तु भवेद्व्याप्तेरन्वयव्यतिरेकतः॥१४३॥ अन्वयव्याप्तिरुक्तैव व्यतिरेकोऽधुनोच्यते॥
साध्याभावव्यापकत्वे हेत्वभावस्य यद्भवेत्॥१४४॥

प्रतियोगिव्यधिकरणस्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वं संयोगाभावसंग्रहाय प्रतियोगिव्यधिकरणेति॰ गगनाभावस्य
प्रतियोगिकस्यात्यन्ताभावप्रतियोगित्वादवृत्तिमदिति॰ एवमग्रेऽपि तद्धेतुसहचारव्यतिरेकि साध्यकमनुमानं केवलव्यतिरेकि॰ यथा पृथिवी
इतरेभ्यो भिद्यते पृथिवीत्वादिति॰ नन्वेवं व्याप्तिग्रहकाले पृथिवीतरभिन्नेति अनुमाने वैयर्थ्यमिति चेन्न गंधवत्वावच्छेदे
तरभेदस्य साध्यत्वात् अतएव पक्षतावच्छेदकं न हेतुरिति वदन्त्याचार्याः नतु तथापीतरभेदः प्रसिद्धो न वा आद्ये सिद्धसाधनं द्वितीये सा
ध्याप्रसिद्धिं विना साध्याभावाज्ञाने व्यतिरेकव्याप्तेर्दुर्ग्रहत्वं स्यादिति चेन्न॰ साध्यस्य प्रत्येकं प्रसिद्धत्वात् पृथिवीतरभिन्नेषु
प्रत्यतीतेरप्रसिद्धत्वात् सिद्धसाधनाभावात् पक्षतावच्छेदके नानात्व एवांशतः सिद्धसाधनस्य दोषत्वात् नन्वेवं पृथिवीतरभिन्ना पृथि
वीत्वात् घटवदित्यन्वयिनैवेतरभेदासिद्धे व्यतिरेकिवैयर्थ्यमिति चेत् न॰ अन्वयव्याप्तिग्रहे व्यतिरेकिस्फूर्त्तिदशायां व्यतिरे

५ साध्यग्रहसंभवात्

अर्थापत्तिरिति॰ अर्थापत्तिरप्यतिरिक्तं प्रमाणमिति केचन मन्यन्ते सा च द्विविधा दृष्टार्थापत्तिः श्रुतार्थापत्तिश्च तत्र दृष्टार्थापत्तिर्यथा पीनो देवदत्तो दिवा
ऽभुंजान इत्यत्र पीनत्वं रात्रिभोजनं विनाऽनुपपन्नमिति रात्रिभोजनकल्पनं श्रुतार्थापत्तिरपि द्वेधा अभिधानानुपपत्तिः अभिहितानुपपत्तिश्चेति
तत्राभिधानानुपपत्तिर्यथा द्वारमिति श्रवणेऽन्वयाभिधानानुपपत्त्याऽन्वयाभिधानोपयोगिपदांतरकल्पनं॰ अभिहितानुपपत्तिर्यथा अ
भिहितस्य स्वर्गसाधनत्वेनोक्तस्य ज्योतिष्टोमादेराशुविनाशिनोऽपूर्वरूपव्यापारं विना स्वर्गसाधनत्वानुपपत्तिरित्यपूर्वकल्पनं॰ अत्रोपप
द्यज्ञानं करणं उपपादकज्ञानं फलं पीनत्वमुपपाद्यं रात्रिभोजनमुपपादकं एवमन्यत्रापि यथायथं बोध्यं। न चास्यार्थापत्तेरनुमानेनैतद्भवि
संभवति अन्वयव्याप्तिज्ञानेनान्वयिलिंगतोऽभावात् संभवात् साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनु
पयोगेन व्यतिरेकिलिंगोऽनंगीकारादेव तत्रांतर्भावविनिरासात् तस्मादर्थापत्तिः पृथगेव प्रमाणमिति मीमांसकमतं निरासयति॰ अर्थापत्ति

॥ अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ॥ व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ॥१४५॥ सुखं तु जगतामेव काम्यं धर्मेण जायते ॥ अ
धर्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसां ॥१४६॥

स्त्विति॰ अर्थापत्तिर्न प्रमाणांतरं यो रात्रौ न भुंक्ते स दिवाऽभुंजानः सन् पीनो न भवतीत्यादि व्यतिरेकानुमानेन गतार्थत्वादित्यर्थः साध्याभावे सा
धनाभावनिरूपितव्याप्तिज्ञानस्य पक्षोपयोगस्तथोपपादितमधस्तात् ॥१४५॥ सुखं निरूपयति॰ सुखमिति॰ अहं सुखीत्याद्यनुगतप्रतीतिसि
द्धं सुखत्वं जातिः यदि सर्वैः जगतामेव काम्यं सर्वात्मनामनुकूलवेदनीयं यद्यप्यनुकूलत्वेन स्वरूपतस्तेन भवतीति यत्कारकं वेदनं अप्यत्वा
दरपि तथापि जन्यत्वे सत्यजन्यजन्येच्छाविषयभावत्वं तदर्थो बोध्यः दुःखाभावेऽतिव्याप्तिवारणाय भावत्वमिति प्रयत्नादावतिव्याप्ति
वारणायाजन्यांतं तदिच्छायाः सुखे स्वाजन्यत्वात्॥ साधनमाह॰ धर्मेणेति॰ एतेन धर्मकार्यतावच्छेदकतया सिद्धं सुखत्वं जातिः सि
द्धेति बुद्धं चेत् सुखस्य लक्षणमिति भावः तच्च चतुर्विधं वैषयिकं मानोरथिकं आभ्यासिकं आभिमानिकं चेति तत्र विषयसंयोगजन्यं
विषयस्पर्शानजं मानोरथिकं अभ्यासनाद्यभ्यासाऽजायमानं शारीरश्रमवादिरूपं तृतीयं पुनर्विपादिगर्वजं चतुर्थमिति बोध्यं ॥१४६॥

इच्छां निरूपयति - निर्दुःखत्वे सुखे चेच्छेति - इच्छा इच्छात्वजातिमती सा चानुगतव्यवहारसाक्षिकाप्रमीयाधारात् श्यत्वजनककृत्यास्वेदकत्याच सिद्धा सा
चेच्छा द्विविधा ईश्वरस्यानित्या सा च सुखे सुखत्वप्रकारक तज्ज्ञानात् । निर्दुःखत्वे दुःखाभावे निर्दुःखत्वप्रकारक तज्ज्ञानादुपाये फले च्छा
फलसाधनता ज्ञानादेव भवतीत्यर्थः एतस्याभेदाः कामः मत्सरः स्पृहा तृष्णा लोभः माया दंभा उक्तान्याय भाव्ये तत्र कामः रतीच्छा मत्सरः
प्रयोजनं विना पराभिमतनिवारणेच्छा - स्पृहा धर्माविरोधेन प्राप्तीच्छा तृष्णा इदं मे न क्षीयतामितीच्छा उचितव्यया करणे नापि धनर
क्षणेच्छारूपं कार्पण्यं च लोभः धर्मविरोधेन परद्रव्येच्छा माया परवंचनेच्छा दंभः कपटेन धार्मिकत्वादिनात्मोत्कर्षख्यापनेच्छा ॥१४१॥
तत्रोपाये प्रवृत्तिकारिचिकीर्षा प्युपाये च्छाभवतीत्याकांक्षायामाह - चिकीर्षेति - या कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयिणीच्छा
पाकोमत्कृतिसाध्यो भवत्वेवमाद्याकारिका सा चिकीर्षेत्यर्थः यद्यपि सन्प्रत्ययान्तकृञ्धातुनिष्पन्नचिकीर्षाशब्दस्यार्थः कृतीच्छेवतथापि
कृतिसाध्यत्वप्रकारिकाक्रियाविषयेच्छा सैवोपायत्वगोचरेच्छा वाचित्वात् तथापि कृतिसाध्यत्वप्रकारकक्रियाविशेष्यकेच्छादिधार्थ

॥निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते॥इच्छा तु तदुपायेषु स्यादिष्टोपायता धीर्यदि॥१४५॥चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा तु या भवेत्॥तद्धेतुः
॥कृतिसाध्येष्टसाधनत्वमतिर्भवेत्॥१४८॥बलवद्द्विष्टहेतुत्वमतिः स्याद्बाधिका मता॥

चिकीर्षाशब्दोऽखण्ड एवेति भावः॥अत्रोपायमाह - तद्धेतुरिति - कृतिसाध्यताज्ञानं इष्टसाधनताज्ञानं च कारणमित्यर्थः नच कृतिसाध्य
त्वप्रकारिकेच्छां प्रति कृतिसाध्यताज्ञानस्य हेतुत्वे मानाभावः कृतसाध्यताज्ञानकाले चिकीर्षावारणाय तदुपगमात् तत्र कृतसाध्यता
ज्ञानाभावस्यैव प्रतिबन्धकाभाववि॰ या हेतुत्वमंगीक्रियतामिति तु न युक्तं कृतिसाध्यत्वज्ञानतापेक्षया कृतसाध्यत्वज्ञानाभावत्वस्य गुरु
त्वात् इच्छायाः समानप्रकारक धीसाध्यत्वेन कृतिसाध्यत्वप्रकारकज्ञानाभावकाले चिकीर्षानुदयाच्चेत्याहुर्विस्तारः॥स्यादेतत् इष्टसाध
नताज्ञानस्य किमिति हेतुत्वमिति चेत् निष्फलत्वेन ज्ञातेपि कृतिसाध्येप्यवंदनादौ चिकीर्षावारणायेत्यवेहि॥१४८॥आकांक्षायामिष्टसाधनेक
तिसाध्ये चिकीर्षा प्रवृत्तिवारणायाह - बलवद्द्विष्टेति - बलवदुत्कटं यद्द्विष्टं द्वेषविषयीभूतं दुःखं तत्साधनताज्ञानं तत्र प्रतिबन्धकं तेनाथो हेतुर्दि

अप्रामाण्यज्ञानानास्कंदितबलवदनिष्टजनकत्वज्ञानं तु पेक्षणीयाऽप्रामाण्यनिश्चयानास्कंदिततदनुबंधित्वज्ञानस्य प्रतिबंधकतावच्छे
दकत्वे गौरवादाह। तद्धेतुत्वेति बलवदनिष्टाऽजनकत्वज्ञानं कारणमित्यर्थः बलवदनिष्टाननुबंधित्वं च इष्टोत्पत्तिनांतरीयकदुःखाधि
कदुःखाजनकत्वं तेनैमधुविषसंपृक्तान्नभोजने चिकीर्षा इष्टोत्पत्तिनांतरीयकदुःखातिरिक्तस्य मरणदुःखस्य तेन जननादिति सं
क्षेपः॥ कस्यचिदित्यनेनास्वरसः सूचितः स चोक्तप्रकारो बोध्यः॥१४८॥ द्वेषं लक्षयति। द्विष्टेति। बलवद्दुःखसाधनताज्ञानं द्वेषस्य
कारणं तेन नांतरीयके दुःखजनके पाकादौ न द्वेष इति भावः॥ लक्षणमस्य द्वेष्मीत्यनुगतमतिप्रमाणकद्वेषत्वजातिमत्त्वमेतस्यावांत
रभेदाः॥ क्रोधेर्ष्याऽसूयाद्रोहामर्षाभिमाना उक्तान्यायभाष्ये तत्र क्रोधः शरीरेंद्रियाधिष्ठानं वैकृत्यहेतुर्ज्वलनात्मकः॥ ईर्ष्या दुरेत
छायादानामिव साधारणवस्तुषु हितरिद्वेषः॥ असूया परगुणासहनं द्रोहः नाशाय द्वेषः अमर्षः अपकारासहिष्णुता॥ अभिमा
नः असमर्थस्यात्मनि द्वेषः॥ यत्नं निरूपयति। प्रवृत्तिश्चेति। प्रवृत्तिनिवृत्तिजीवनयोनियत्नभेदात्प्रयत्नस्त्रिविध इत्यर्थः॥

॥ तद्धेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥१४९॥ द्विष्टसाधनताबुद्धिर्भवेद्द्वेषस्य कारणं। प्रवृत्तिश्च निवृत्तिश्च तथा जीवितकारणं। एवं प्रय
त्नत्रैविध्यं तांत्रिकैः परिकीर्तितं ॥१५०॥ चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा। उपादानस्य चाध्यक्षं प्र^

लक्षणमस्य करोमीत्यनुगतमतिसिद्धं चेष्टादिकारणतावच्छेदकतया वा सिद्धं प्रयत्नत्वं जातिः॥१५०॥ तत्र प्रवृत्तौ कारणमाह। चिकीर्
षेति मत्कृत्यासाध्ययागादौ चिकीर्षां विना प्रवृत्तेरदर्शनात्। चिकीर्षा प्रयत्नो हेतुः कृतिसाध्ये चंद्रमण्डलादिविषये प्रवृत्त्यदर्शनात् कृतिसाध्यताज्ञा
नं हेतुः कृतिसाध्यत्वज्ञानेऽपि विषभक्षणादौ प्रवृत्त्यदर्शनादिष्टसाधनताज्ञानं हेतुः तदुभयसत्वेऽपि उपादानस्य प्रवृत्त्यदर्शना
दुपादानप्रत्यक्षं हेतुरित्यर्थः उपादानपदमत्र न समवायिकारणपरं किं त्वधिष्ठानमात्रपरं अन्यथा शब्दसाध्यकप्रवृत्तिर्मृदंगादौ न
स्यात् शब्दसमवायिकारणस्य गगनस्यातींद्रियत्वात् तथा च तत्साध्यकप्रवृत्तिं प्रति तदधिष्ठानगोचरलौकिकप्रत्यक्षस्य हे
तुत्वमिति पर्यवसितं॥ यद्यपि मधुविषसंपृक्तान्नभोजने प्रवृत्तिवारणाय प्रवृत्तौ बलवदनिष्टाननुबंधित्वज्ञानमपि हेतुर्वक्तुं युक्तं

मूलं। यत्नो जनकं भवेत्॥१५१॥

निवृत्तिरिति द्वेषः फलगतो बोध्यः तथाच फलगतोद्वेषो द्विष्टसाधनताज्ञानं चान्वयव्यतिरेकाभ्यां निवृत्तिं प्रति कारणमित्यर्थः॥ यत्नइति॰ जीवन
हेतुर्यत्नो यावज्जीवमनुवर्त्तते सचातीन्द्रियः तत्रप्रमाणमाह॰ शरीरइति शरीरे साहजिको यः प्राणसंचारस्स एवेत्यर्थः॰ सुषुप्तिश्वासादि
स्थले प्राणसंचारे प्रयत्नजन्यत्वस्यानुमधिकलात्प्राणसंचारत्वावच्छेदेन तदनुमितौ पक्षविशेषादतीन्द्रियप्रयत्नसिद्धिरिति भावः॰
नव्यास्तु जीवनयोनियत्ने मानाभावः प्राणक्रियाया अदृष्टविशेषाश्रयोप्यात्ममनोयोगरूपाज्जीवनाद्वासंभवात् कथितानुमा
नस्याप्रयोजकत्वात् स्वप्रथमापकवयत्नेनान्यजन्यत्वदृष्टान्तेन जन्ययत्नत्वावच्छेदेन ज्ञानजन्यत्वकल्पनापत्त्या सुषुप्तौ ज्ञानादेर
प्यतीन्द्रियस्य कल्पनापत्तेरिति प्राहुः वेदान्तिनस्तु तत एव सुषुप्तौ ज्ञानमपीच्छन्तीति रहस्यं॥१५२॥ गुरुत्वं निरूपयति॰ अतीन्द्रियमि
ति अनेन गुरुत्वे न प्रत्यक्षं मानं किं त्वनुमानमित्युक्तं तच्च संयोगाद्यसमवायिकालीनाक्रिया असमवायिकारणजन्या क्रियात्वात् संयोगादि

॥निवृत्तिस्तु भवेद्द्वेषाद्द्विष्टसाधनताधियः॥ यत्नोजीवनयोनिस्तु सर्वदातीन्द्रियो भवेत्॥ शरीरप्राणसंचारे कारणं तत्प्रकीर्तितं॥१५२॥
॥अतीन्द्रियं गुरुत्वं स्यात्पृथिव्यादिद्वये तु तत्॥ अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतं॥ तदेवासमवायी स्यात्पतनाख्ये तु कर्मणि॥१५२॥ सां

जन्यक्रियावदिति अन्येतरबाधाद्गुरुत्वसिद्धिः॥ अनित्येष्विति कार्येति गुरुत्वमनित्यं नित्यपरमाणौ नित्यं गुरुत्वमित्यनुवर्त्तते तत्तद्
गुरुत्वं असमवायिकारणं पतनेति॰ आद्यपतनेत्यर्थः॰ पतनमधःसंयोगजनककर्मविशेषः तथाचाद्यपतनासमवायिकारणत्वं लक्षण
मिति भावः॰ क्रियाजनके वाय्वादिसंयोगेऽतिव्याप्तिवारणाय पतनपदं वेगजन्यद्वितीयादिपतनासमवायिकारणे वेगेऽतिव्याप्ति
वारणाय आद्यपदं द्रव्येऽसमवायिकारणेऽतिव्याप्तिवारणाय असमवायिकारणपदं बोध्यम् नतु सुवर्णादेरपि पतनात्तत्र गुरुत्वाभावा
द्व्यभिचार इति वाच्यं पार्थिवभागनिष्ठगुरुत्वेनैव पतनसंभवात् गुरुत्वाश्रयपार्थिवस्यांशे पतनवतीसंबद्धतेजसोऽपि पतनसंभवादित्य
न्यत्र विस्तरः॥१५३॥ द्रवत्वं निरूपयति॰ सांसिद्धिकमिति॰ द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकं चेत्यर्थः॰ सांसिद्धिकं नैसर्गिकं अथ
एवद्रवत्वं जन्यक्षितियावत्॰ द्वितीयं नैमित्तिकं अग्निसंयोगविशेषासमवायिकारणकं॥१५४॥ श्रीरामो जयति॥५५

मै ३

यागादीति ॥ आदि पदात् होमदानप्रतिग्रहः । यागो देवतोद्देशेन स्वस्वत्वध्वंसरूपद्रव्यविशेषकद्रव्यदेवतोद्देशाः देवतास्वत्वबुद्धिरूपो यः कस्य तन्नोपि संयोगानुकूलक्रियानुकूलयत्नाद् यतिनो दनादिव
विना स्वस्वत्वध्वंसपरस्वत्वजनकत्यागो वा ॥ अत्र सर्वत्र धर्मो व्यापार आत्मधर्मः अन्यथा चिरविनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वं न स्यात् ॥ ननु व्यापा
रान्तरकल्पना वेल्यम् तत्ता यागादिध्वंसस्यैव व्यापारत्वमस्तु । न चाभावस्य कारणत्वे कारणतावच्छेदकाभावप्रतियोगितेन यागस्य प्रतिबन्धकत्वापत्तिः प्रतिबन्धकतया संसर्गाभावत्वा

स्थितस्थापकेति । आरूढस्य शारवादेः पूर्वदिग्यागे पुनस्तथैव स्थापकः संस्कार इत्यर्थः अत एव अन्वर्थ्यसंज्ञा स्थितं स्थापयतीति व्युत्पत्तेः स्थितादिति मा
त्राभावे न जलादावपि स्थितिमात्ररूपत्वमित्यर्थः [illegible] केचिदिति । क्षित्यादिषु चतुर्षु स्थितस्थापकं मन्यन्ते तद्वदप्रमाणमि
ति भावः ॥ तत्र स्थितिस्थापकं केचित् । अतीन्द्रियत्वादेव तेनास्य लक्षणं क्रियाविशेषजनकतावच्छेदकतया सिद्धं स्थितस्थापकत्वं जाति
रिति सूचितं ॥१५८॥ भावनाख्यं निरूपयति । भावनाख्य इति । जीवरूपी यत्नेन जीववृत्तिसंस्कारत्वेन लक्षणं सूचितं ॥ लक्षणान्तरं स्मृतिजनक
नतस्य कार्यलिङ्गमेव वक्ति । उपेक्षानात्मकं इति । अयत्ति निश्चयोर जनको यस्तद्भिन्न इत्यर्थः । उपेक्षात्मकज्ञानो संशयाद्युक्त स्मृतेर दर्शनात्र स्मृतिहेतु
संस्कारं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वमिति भावः स्मृतिं प्रत्येव हेतुत्वं कल्प्यतामिति तन्न युक्तं उपेक्षाज्ञानादिस्थले संस्कारप्रसङ्गाभिया सं
स्कारं प्रति तथाविधनिश्चयत्वेन हेतुतायाश्च वश्यं वक्तव्यत्वे तया स्मृतिं प्रति पुनस्तत्कल्पनायां मानाभावात् अनेन तादृशनिश्चयजन्य
तावच्छेदकातीन्द्रियधर्मवत्त्वमपि लक्षणमिति लब्धं । तत्र प्रमाणं दर्शयति । स्मरणं इत्यादि स घटः इत्यादि स्मृतौ सोयमित्यादिप्रत्य

॥ स्थितस्थापकः संस्कारः क्षितौ केचिच्चतुर्ष्वपि ॥ अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणं ॥१५८॥ भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः ॥ उपेक्षानात्मक
॥ स्तस्य निश्चयः कारणं भवेत् ॥ स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ॥१५९॥ धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनं ॥ यागादिजन्यस्तु नादिव्यापारः स तु कीर्तित
॥ तः ॥१६०॥ कर्मनाशाजलस्पर्शादिना नाश्यस्तु सो मतः ॥ अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः ॥१६१॥ ॥८॥

मोरया चिन्त्यसंस्कारः ४

भिज्ञायां चासौ संस्कारस्ताद्रूप्येण कारणमित्यर्थः व्यापारं विना निश्चयस्याशुविनाशिनः कालान्तरभाविस्मृतिजनने सामर्थ्या
दिति भावः तथा च घट इत्यादिप्रकारकस्मृतिजनकतावच्छेदकधर्मवत्त्वमपि लक्षणमिति आसंसारस्य योविशेषहेतुहेतुमद्भाव प्रक
रान्तरतान्तेऽतिव्याप्तिरिति वाच्यं ननु प्रत्यभिज्ञायां संस्कारजन्यत्वे कुतो न स्मृतित्वमिति चेत् संस्कारमात्रजन्यत्वाभावादिति वेहि
विस्तरस्त्वन्यत्रावसेयः ॥१५९॥ अदृष्टं निरूपयति । धर्माधर्माविति । धर्माधर्मान्यतरत्वमेवादृष्टत्वमित्यर्थः धर्म इति स्वर्गादिसाधनं स्व
र्गादिसाधारण [illegible] कारणं स्वर्गपदेनात्र सुखमात्रस्यादिपदेन शरीरेन्द्रियादेः परिग्रहः ॥ तथा च सुखाद्यसाधारणकारण
विगुणत्वव्याप्यजातिमत्त्वं लक्षणं लब्धं तेन कीर्तनादिनाशस्य धर्मे नाव्याप्तिरिति बोध्यम् । अत्र प्रमाणं दर्शयितुमाह ।

१८ प्रसतके

35

परमाणाविति जलपरमाणौ द्रवत्वं नित्यं अन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ चानित्यं वह्निसंयोगजन्यं नैमित्तिकं घृतादावाह नैमित्तिकमिति तो
व्यादिपदात् जसिरूपलदिदोरयोस्तु विशेषः स्वाभाविकनाशे आश्रयनाशस्य हेतुः नैमित्तिकनाशे वह्निसंयोगः क्वचिदाश्रयनाश इति वोध्य
मू॥ न च नैमित्तिकद्रवत्वस्य परमाणुवृत्तित्वे मानाभावः पाकस्य घृतादिपिण्डवद् घृतादिपरमाणुष्वप्यङ्गीकर्तव्यत्वात् तत्रापि तत्सिद्धेरिति वदन्ति परे तु
रूपरसादिजनकपाकस्य लाघवेनैव व्यात्मसेवरद्रवजनकतया परमाणौ तत्सिद्धिरित्याहुः॥ लक्षणमाह स्यन्दन इति स्यन्दनं जलादेर्गमनं द्वितीये
प्रसंयोगजनकक्रियाविशेषः तस्यासमवायिकारणमित्यर्थः स्यन्दनमेवाद्यं यास्य तेनाद्यस्यन्दनासमवायिकारणत्वं लक्षणमिति भावः द्वि
तीयस्यन्दनासमवायिकारणे वेगेऽतिव्याप्तिवारणाय आद्यपदं क्रियाजनके द्रवत्वेऽतिव्याप्तिवारणाय असमवायिकारणपदं॥ संग्रहे इति संग्रहः
सक्तुकादेः पिण्डीभावे हेतुः संयोगविशेषस्तत्र स्नेहसहितं द्रवत्वं स्नेहसहितं निमित्तकारणमित्यर्थः तेन द्रुतसुवर्णादिना न संग्रहः न च स्नेहेनान्यथा
सिद्धिः विनिगमकाभावेन तदुभयहेतुत्वसिद्धिरित्यन्यत्र विस्तरः॥१५५॥ स्नेहं निरूपयति स्नेह इति संग्रहकारणसंयोगविशेषजनकगु

॥परमाणौ जले नित्यमन्यत्रानित्यमिष्यते॥ नैमित्तिकं वह्नियोगात्तपनीयघृतादिषु॥ द्रवत्वं स्यन्दने हेतुर्निमित्तं संग्रहे तु तत्॥१५५॥
॥स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ॥ तैलान्तरे तत्प्रकर्षाद्दहनस्यानुकूलता॥१५६॥ संस्कारस्त्रेधा वेगश्च स्थितिस्था०

णत्वमर्थः तथा च तादृशगुणत्वं स्नेहत्वं इत्यनुगतमतिसिद्धस्नेहत्वजातिमत्त्वं वा लक्षणमिति भावः जल इति जल एवेत्यर्थः स स्नेहः॥ ननु पृथिव्या
मपि तैले स्नेह उपलभ्यते न चासौ जलीयस्तथा सति दहननाशप्रसङ्गात् दहननाशं प्रति संयोगेन जलस्य हेतुत्वादित्यत आह तैलान्तर इति तत्प्रकर्षा
त् तैले प्रतीयमानस्नेहोऽपि तैलान्तर्गतजलभागनिष्ठ एवेति तस्य प्रकर्षत्वात् दहनेनानुकूल्यं अपकृष्टस्नेहं हि जलं वह्निं नाशयतीति भावः॥१५६॥
संस्कारं निरूपयति संस्कारभेदा इति वेगस्थितिस्थापकभावनाभेदात् संस्कारस्त्रिविध इत्यर्थः लक्षणं तु संस्कारव्यवहारकारणीभूता या जाति
विषयत्वं आत्मविशेषगुणवृत्तिमूर्त्तवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं वा आत्ममनःसंयोगनिष्ठकारणताया विशेषगुण एव वृत्तीति मूर्त्तमात्रे इ
ति अनेन व्यापकेषु वेगो नास्तीति सूचितं न तु उपपादयति कर्मज इति वेगो द्विविध इत्यर्थः लक्षणमस्य वेगत्वमनुगतमतिसिद्धं क्रिया
विशेषजनकतावच्छेदकतया च सिद्धं वेगत्वं जातिः न वृत्तिर्हि वेगः क्रियाविशेषहेतुः यथोत्तरसंयोगस्य क्रियानाशकतया वाणादेरुत्त
रदेशोपर्णादिसंयोगेऽपि क्रियान्तरदर्शनात्तस्या वेगजन्येति संक्षेपः तत्र कर्मजः काण्डे तत्र पूर्वकर्मनाशादुत्तरकर्मणश्च सिद्धये कर्मज

मूलं १ पकभावने॥ मूर्त्तमात्रे तु वेगः स्यात्कर्मजो वेगजः क्वचित्॥१५७॥

कर्मजो वेगजो वा कर्मजः स्यादिति
तदेव वेगजः इति संक्षेपः॥१५७॥

आगदेवव्यापारं विनापिनिर्वहमाशंक्याह· प्रायश्चित्तादीति· आदिना भोगपरिग्रहः अत्रापि पूर्वोक्तरीत्याशयश्चित्तादिनाश्यतावच्छे
दकनिर्वचनानुरोधेनाधर्मसिद्धिः इत्थं हननादिक्रियायाः प्रागेव नष्टत्वात् तद्ध्वंसस्य च ध्वंसासंभवादधर्मस्य मेयनाश्यतावच्छेद
कं तद्वानेवाधर्म इति भावः।। जीवेति· ईश्वरस्य धर्माधर्माभावादिति भावः।। ननु गंगादिदर्शनादिना ईश्वरे कुतो न धर्मादिरत आह·
इमौ त्विति· इमौ धर्माधर्मौ वासना अत्र संस्कारो न तु तत्त्वज्ञानजाग्रभावः संस्कारस्यैव विरोधिविषयकत्वेन ज्ञाननाश्यत्वसंभवात् न
तु हि मिथ्याज्ञानजन्यत्वे शिरःस्य वासनाजन्यत्वानुसरणं किमिति चेत् सत्यं तथोक्तौ मिथ्याज्ञानस्य कर्मातिरिक्तस्याप्रसु विनाशि
तः स्वजन्यवासनासंबंधेन हेतुत्वं व्याख्येयं तदपेक्षया वासनाजन्यत्वकथनमेव लघुभूतावताच नका विहानिरिति स्यादेतत् तथापि
धर्माधर्मौ प्रति वासनायाहेतुत्वे किं मानमिति चेत् यथा पुष्करपलाशे आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यत इति श्रुत्या
ज्ञानिकृतकर्मणां फलाभावश्रवणाद्वेदस्य वेहि स्यादेतत्तथापि संचिताभ्यां तत्त्वे [illegible] फलं स्यादेवेत आह· ज्ञानादपीति· अपिनाभो

॥प्रायश्चित्तादिनाश्योऽसौ जीवन्मुक्तिगुणान् विमे॥ इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः॥ १६२॥

गपरिग्रहः तथापि प्रारब्धस्य भोगेनैव क्षयः नानुक्तं क्षीयते कर्म कल्पकोटिशतैरपीति प्रमाणात् अनारब्धकार्याणां तु आत्मतत्त्वज्ञानादविध्व
स्तो भवति· भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुतेस्तद्धिगम उत्तरपूर्वाघयो
रश्लेषविनाशौ तद्व्यपदेशादित्यादिसूत्रेरनारब्धनाशमात्रपरत्वसमर्थनेन तथावगमात् नाधाश्चात्र न यथाश्रुतोऽभिमतः।। किंतु स्वा
श्रये फलाजनकत्वमेव तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति श्रुत्या ततस्तदिद्धर्मादेरन्यत्र फलकथनाद
स्यास्याविस्तरः अत्र धर्मवदधर्मनाशस्यापि फलत्वकथनं तु सर्वपापानां निवर्त्तत इति श्रुत्या पापत्वेनोक्तसुकृतस्यापि मध्ये विषयसंघको
न्नभोजनवदेयत्वज्ञापनाय· अत एवोक्तं श्रुतौ।। पातकं च यथा धर्मो मता तत्तुल्यं पुण्यमपि नोपलभ्यन्तीहि।। कांचनीयमयं तु लोहमयी वाश्रृंख

ज्ञानतुपादयोर्विशेषइति· ननु तथापि तमेव विदित्वेत्यादिश्रुत्या तत्त्वज्ञानस्यात्यन्तिकदुःखनिवृत्तिलक्षणमोक्षं प्रत्येव हेतुत्वकथनात्तद्वि
हाय कथमत्रादृष्टनाशं प्रत्येव हेतुत्वमुल्लिखितमितिचेन्न· शृणु अत्र हीदं· दुःखस्यातीततत्कालवर्तमानस्य विरोधिगुणान्तरेणैव निवृत्तिसं
भवात्· अनागतस्य सिद्धासिद्धिव्यान्निवर्त्तेरनिर्वाच्यत्वात् हेतूच्छेदपरतत्फलमवश्यं वक्तव्यं हेतुश्च सवासनमिथ्याज्ञानं तच्चाधि
ष्ठानादेवप्रलोपधायकमिति सहेतुकं तन्नाशं प्रत्येव तथोक्तमिति· ननु कथं तत्त्वज्ञानं मुक्तिसाधनं अहमस्मीत्यापातप्रत्यक्षस्येदा
नीमपि जागरूकतया मुक्त्यनुदयात् व्यभिचारस्य दुर्वारत्वादितिचेन्न न मोक्षजनकतावच्छेदकं वैजात्यावच्छिन्नसाक्षात्कारस्य नि
दिध्यासनपरिपाकहेतुकस्येदानीम [illegible] भावेतदभावात् व्यभिचाराभावात् स्यादेतत् तथापि कीदृशात्मतत्त्वसा
साक्षात्कारो मुक्तिहेतुः किमात्ममात्रविषयकः किंवात्मा देहेन्द्रियादिभिन्नइत्याद्याकारः नाद्यः तस्य देहेन्द्रियादितादात्म्यप्रकारक
मिथ्याज्ञानतज्जन्यसंस्कारयोरविरोधेनानिवर्तकत्वापत्तेः नान्त्यः तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथेत्यादिश्रुतिबा
धापत्तेरितिचेत् अत्र वेदान्तिनः निर्विकल्पकमेवात्मज्ञानं मुक्तिजनकं तमेवैकमेवकारेणात्मत्वादिविशिष्टसविकल्पकव्य
वच्छेदात् नच तस्य मिथ्याज्ञानाविरोधः श्रुतिबलेन निदिध्यासनजन्यस्य तस्य विजातीयस्य मणिमन्त्रादिन्यायेन तद्वि
रोधित्वकल्पनादितिप्राहुः तार्किकास्तु आत्मा देहादिभिन्न इत्याद्याकारं सविकल्पकमेव ज्ञानं स्वात्मगोचरं मोक्षजनकं वि
रोधिविषयकत्वेन तस्यैव स्वाविरोधोच्छेदक्षमत्वात् नचैवं श्रुतिबाधः तात्पर्यपर्यालोचनतः एवकारेण देहादिभेदविशि
ष्टसविकल्पान्यज्ञानस्यैव व्यवच्छेदात् तद्बाधादितिवदन्ति· ननु तथापि कथमुच्यते जीवात्मज्ञानं मोक्षसाधनं तमेवैका
दौ तच्छब्देनेश्वरपरामर्शात् यदाचर्मवदाकाशं वेष्टयिष्यन्ति मानवाः तदा देवमविज्ञाय दुःखस्यान्तो भविष्यतीत्यादिश्रु
त्या मामेव ये प्रपद्यन्ते मायामेतां तरन्ति इति भगवदुक्त्या चेश्वरज्ञानस्यैव मोक्षहेतुत्वप्रतिपादनादितिचेत् अत्र वदन्ति·

३६

मंत्रव्यो

ईश्वरविषयकज्ञानस्योपासनारूपस्य स्वजन्यादृष्टद्वारा मुक्तिजनकजीवात्मज्ञानप्रतिबंधकासंभावनादिनिराकरणेन जीवात्मज्ञानेउपयो
गेन साक्षान्मुक्तौ अविरोधेन मिथ्याज्ञानोच्छेदसमर्थत्वाभावात् तमेवेत्यादि श्रुतितात्पर्यविवलतो बुद्धिस्थत्वेन जीवपरामर्शकतमेवविदि
त्वेति निगमवाक्येति चेत् न वा अरे सर्वस्य कामाय सर्वं प्रियं भवतीत्युपक्रम्य आत्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्य इति वदंती
श्रुतिरेव विनिगमकेति गृहाण ननु तथापि कथं ज्ञानादेव मोक्ष उच्यते विद्यां चाविद्यां च यस्तद्वेदोभयं सह इत्यादिश्रुत्या तु ज्ञा
नहेतुर्विज्ञानं कर्म चोक्तं महामुने॥ उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिरिति
स्मृत्या च कर्मणोपि मोक्षसाधनत्वकथनादिति चेन्न नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयं ज्ञानं च विमलीकुर्वन् अभ्यासेन च
पाचयेत् अभ्यासात् पक्वविज्ञानः कैवल्यं लभते नर इत्यादिना कर्मणो ज्ञानप्रतिबंधिकापधर्मनाशद्वारा तत्त्वज्ञान एवोपयुक्तत्वप्रति
पादनात् न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरित्यादिश्रुतिभिर्मोक्षहेतुत्ववर्जनाच्च तस्मात्कर्म ज्ञानेहेतुः ज्ञानं

॥शब्दो ध्वनिश्च वर्णश्च मृदंगादिभवो ध्वनिः॥

मोक्ष इति सिद्धं एतेन काशीमरणात् मुक्तिरित्यादिकमपि व्याख्यातं अत्र हि जंतोः प्राणेषु उत्क्रममाणेषु रुद्रस्तारकं ब्रूयाद्ब्रूते।
येनासावमृतीभूत्वा मोक्षी भवतीत्यादिश्रुत्या काशीमरणस्य ज्ञानं प्रत्येव हेतुताबोधनादित्यन्यत्र विस्तरः॥१६१॥ शब्दं निरू
पयति शब्द इति वर्णध्वनिभेदेन शब्दो द्विविधः तत्र ध्वनिं लक्षयति मृदंगादीति आदिना वंशदलविभागजन्यस्य चटचटाशब्दाजो
योः परिग्रहः तथा च ध्वनिस्त्रिविधः संयोगजो विभागजः शब्दजश्चेति तत्राद्यो कंठपाणिघात वीणाहस्तादिसंयोगजन्यः
संगीतशास्त्रसिद्धानेकभेदात् द्वितीयः वंशे पाट्यमाने वंशदलद्वयविभागजन्यश्चटचटाशब्दः॥ तृतीयो मृदंगादिदेशमारभ्य

१२३

॥१६४॥५

वर्णात्पत्तिं निरूपयति · कंठसंयोगादीति · कंठताल्वादिसंयोगजन्य इत्यर्थः आदिना ताल्वोष्ठपुट व्यापारादि परिग्रहः तथाच स्वस्वात्पत्तौ
ट व्यापारास्साधारणकारणत्वं कशब्दत्वं लक्षणमिति भावः॥ उद्दिशतिकादय इति॥१६३॥ नमोवृत्तिः आकाशसमवेत दूरस्थशब्द
स्यागृहणादाह · श्रोत्रेति · एतेन वर्णध्वनि भेदेनोभयविधशब्दस्य श्रोत्रग्राह्यत्वेत्ति गुणत्वव्याप्यजातिमत्वं लक्षणमपि लब्धं
मिति मंतव्यम् · ननु मृदंगादावच्छेदेनोत्पन्नस्य श्रोत्रे कथमुत्पत्तिस्तत्राह · वीचीति · स च न्यायद्वयं प्राथम्येन दिक्चतुष्टये एकः
शब्दः एवं धारारूपेण श्रोत्रपर्यंतं शब्दोत्पत्तिरिति · कदंबेति॥ आद्यं न्यायद्वयं प्रथमशब्देन दिक्चतुष्टये शब्दचतुष्टयं तेन तथैव
शब्दांतरएवं क्रमेण श्रोत्रपर्यंतं शब्दोत्पत्तिरिति केचित्तु यदा सर्वदिग्वर्तिवायुस्तदा वीचीतरंगन्यायः यदैकदिग्वर्तिवायुस्तदा
कदंबगोलकन्याय इति वदंति॥ अस्मिन्कल्पे गौरवादुक्तं॥ कस्यचिन्मत इति॥ ननु शब्दस्यानित्यत्वात् तदुत्पत्तिकथनमसंगतम्

॥ कंठसंयोगादिजन्या वर्णास्ते कादयो मता॥१६३॥ सर्वशब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते॥ वीचीतरंगन्यायेन तदुत्पत्तिस्तु कीर्तिता॥१६४॥ कदंबगोल
॥ कन्यायादुत्पत्तिः कस्यचिन्मते॥ उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता॥१६५॥ सोयं क इति बुद्धिस्तु साजात्यमवलंबते॥ तदेवौषधमित्यादि सजातीयं

मित्यत आह · उत्पन्नमिति · शब्दानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः॥ ननु तर्हि सोयं ककार इत्यादि प्रत्यभिज्ञाया
का गतिस्तत्राह ॥ सोयमिति · साजात्यमिति · तज्जातीयोयमित्यर्थिकावत्तु तदभिन्न इत्यर्थिकेति भावः॥ एवं वेनिर्णीतं तत्राह ·
तदेवेति · यदेवौषधं मयापूर्वं भुक्तं तदेवेदानीं भुज्यत इत्यादि प्रत्यभिज्ञायाः सजातीयविषयावगाहित्वदर्शनात् नान्यथा र्थः
न च तर्हि एतन्मते तज्जातीयोयमित्येवाकारः प्रत्यभिज्ञायाः स्यान्नतु सोयमिति वाच्यं यत्र प्रत्यभिज्ञायां जातिर्विशेषणत्वेन
भानं तत्रैव तज्जातीयोयमित्याकारः यत्र स्वरूपतो भानं तत्र सोयमित्येवाकार इत्यभ्युपगमादिति न कोपि विरोध इत्यलं
विस्तरः॥ अत्र वर्णानित्यत्वकथनं वेदकर्तृत्वेनेश्वरसिद्धिः तदुज्जनातः कृतार्थतेति लापनाय चेति संक्षेपः॥१६५॥

मूलं॰ ग्रंथिदर्शनात॰॥१६६॥ इति महाचार्यश्रीविश्वनाथपंचाननरचितो भाषापरिच्छेदः समाप्तः॥

[illegible]

१६२०

२८